OM-TAT-SAT-PRAṆAVA-KALPA

and

NYĀSA-PADDHATI

by

Ānandatīrtha Bhagavatpāda

Edited By

Dr. Bannañje Govindācārya

Dwaipāyana Pratiṣṭhānam

Bengaluru

2018

OM-TAT-SAT-PRAṆAVA-KALPA and
NYĀSA-PADDHATI
of **Sri Ānandatirtha Bhagavatpāda**

Edited By : Dr. Bannañje Govindācārya.
Padmasri awardee,
Vidyaratnākara, Vidyāvācaspati,
Abhinavapaṇditācārya

Published By : Dwaipāyana Pratiṣṭhānam
523, 2nd main, 2nd cross,
New no. 52, Malleshwaram
Bengaluru-560003. cell: 9945271641
Dwipayanapratishthana@gmail.com

© Editor

First Edition : 2018 (500 Copies)

Pages : 10+62

Price : ₹100/–

inside Artwork : Ujjwala Nīlamaṇi Ukraine [उक्रयीन]

Cover Design : K. M. Sheshagiri

Typeset : Kaddi Badrinarayanachar
Poornaprajna Vidyapeetha,
bnkaddi@gmail.com

Printers : Sri Anirudh Creations
#144, 6th main, Gururaja Layout,
Bengaluru-28. Cell: 9880077876
srikant.nsil@gmail.com

आनन्दतीर्थभगवत्पादः

*

ओन्तत्सत्-प्रणवकल्पः
न्यासपद्धतिः

*

व्याख्याता सम्पादकश्च
डा. बन्नञ्जे गोविन्दपण्डिताचार्य्यः

*

द्वैपायनप्रतिष्ठानम्
बेङ्गळूरु
२०१८

भगवान् बादरायणः

चित्रकारः - उज्ज्वलनीलमणिः

प्रवेशिका

सर्वज्ञमुनिना वेदोदितमध्वपदाभिख्येन श्रीमदानन्दतीर्थभगवत्पादेन विरचितमिदं कृतिद्वयम्, ओन्तत्सत्प्रणवकल्प इति न्यासपद्धतिरिति च, इदमुपज्ञं सव्याख्यानमुपस्थाप्यते । तदिदमणुतरं कृतिरत्नद्वयं सन्न्यासस्वीकारविधानं सन्न्यासिनां जीवनविधानं च प्रकाशयत् तुरीयाश्रमं प्रविविक्षूणां प्रविष्टानां च महोपकारकमिति न तिरोहितं बुभुत्सूनाम्, भगवत्पादग्रन्थेष्वन्तर्दृष्ट्याऽधीतिनाम् ॥

अथाप्यहो अनादरेणेवालक्षितकल्पमेतावन्तमनेहसं कृतिरत्नद्वयमिदं निलीय तस्थौ । आश्चर्यमेतद् यदोन्तत्सत्प्रणवकल्पस्य प्रणवकल्प इति सङ्क्षेपाभिधानस्य नामार्थमप्यजानन्तः यतिप्रणवकल्प इति स्वयङ्कृत-नवीननामकरणा नाम्नो वैशिष्ट्यमेव व्यनाशयन् । असङ्गतं चेदं नाम-करणम् । नह्ययतीनामपि कश्चन प्रणवकल्पो नामास्ति । इतोऽपि विस्मयावहं यत् न्यासपद्धतेः श्रीमध्वकृतितामेव व्यस्मार्षुर्म्माध्वाः । सप्तत्रिंशदेव मध्वकृतय इति विभ्रममातृकोऽयं प्रमादः । दौर्भाग्यमेतत् जिज्ञासोः सज्जनसमाजस्य ॥

अणुनी द्वे अपि कृतिरत्ने । अथ महार्थगर्भिते । अथापि कोऽपि न व्याचख्यौ । प्रायः सर्वे व्याख्यातारः वाक्यार्थगर्ते पतिताः, तत्रैव परस्परं योद्धुं प्रयतमानाः न तत उत्तीर्य प्रमेयग्रन्थेषु दत्तभराः ॥

यद्यपि श्रीमध्वानुजेन विदितवेद्येन श्रीविष्णुतीर्त्थेन एतत्कृतिद्वयमवलम्ब्यैव सन्न्यासपद्धतिर्व्यरचि । व्याचख्यौ च तां श्रीवादिराजश्रीचरणानुजः श्रीसुरोत्तमतीर्त्थः योऽच्युतप्रज्ञसंस्थानमलञ्चकार । परन्तु विष्णुतीर्त्थीयं नानयोः साक्षाद् व्याख्यानं प्रतिपदार्त्थचिन्तनरूपम् । किन्त्वनयोर्विस्तृतं विवरणमेव ॥

ततः परं न केनापि व्याख्यातुं प्रायः प्रायत्यत । हन्त विष्णुतीर्त्थीयमपि बहुभिर्विस्मृतप्रायम् । अत एतां कृतिमदृष्ट्वैव कृष्णाचार्य्यकृतस्मृतिमुक्तावल्यादिषु श्रावणकृष्णाष्टम्यामेव कृष्णजननमिति निरूपितम् ॥

अथ तद्व्याख्यानस्य सुरोत्तमतीर्त्थीयस्य सम्प्रति कथाऽपि न श्रूयते । अपूर्वमेतद् व्याख्यानं बाल्ये मया समग्रं समैक्षि । हन्त पुनर्दौर्भाग्यं तत्वबुभुत्सूनां यत् साऽपि व्याख्या सम्प्रत्यदर्शनं गता । प्रथमाद्ध्यायस्य कानिचन पत्राणि श्रीसोदेमठे सन्तीति श्रूयते । अन्यत् सर्वं लुप्तमेव । न जानीमः कस्येदं हस्तलाघवमिति ॥

विष्णुतीर्त्थीयं मूलमात्रं बहोः कालात् पुरा रजतपीठपुरे मुद्रितम् । किन्त्वशुद्धिबहुलम् । ततः परमन्यः कश्चिदर्वाचीनः तमेवाशुद्धपाठं चक्षुषी निमील्य मुद्रयामास । तेन तस्यापि शुद्धः पाठः सम्प्रति दुर्ल्लभ एव । शुद्धपाठसंरक्षणे महत्यनास्था विदुषामपीति महदिदं विषादपदम् ॥

* * *

सुरोत्तमतीर्त्थीयस्य विनाशनेन च सम्प्रत्यपूर्वं प्रमेयद्वयं निरालम्बनं बभूव । द्वयमिदं तत्र स्फुटमगादि न्यासपद्धतिर्म्मध्वस्य कृतिरिति, श्रीमध्वः पाशमन्थानपाणिं श्रीकृष्णं रूप्यपीठपुरे पश्चिमाभिमुखमेव प्रतिष्ठापयामासेति च । यदि सा टीका उपालप्स्यत, सम्प्रति यदुभयमपलपनम्—न्यासपद्धतिर्न्न मध्वकृतिरिति, श्रीकृष्णं पूर्वाभिमुखमेव श्रीमध्वः

प्रत्यष्ठापयदिति च, तत् शाश्वतं व्यरंस्यत। सुरोत्तमतीर्थः किल कनकदाससमकालीनः ॥

* * *

अन्यच्चेदमत्र निवेदनीयम्– श्रीमध्वविजयानुसारि श्रीविष्णुतीर्थविजयाख्यं लघुकाव्यमेकं मया बाल्येऽवलोकितम्, यत्र विष्णुतीर्थस्य पूर्वचरितमुपवर्ण्णितम्। तत्रैवं कथा श्रूयते– 'श्रीविष्णुतीर्थः पूर्वं गार्हस्थ्यमनुभूय नष्टेषु पत्नीपुत्रादिषु मध्वगुरोः सकाशात् तुरीयाश्रमं स्वीचकार' इति। यदीदं काव्यं प्रामाणिकं तदा बालसन्न्यासकथाऽप्यपगता। सम्प्रति सोऽपि ग्रन्थो नष्टः। प्रायः स्वकल्पितकथारक्षार्थं सम्प्रदायान्धैः तदपि काव्यं नाशितमासीदित्यूहामहे ॥

परिशुद्धं विष्णुतीर्थीयं ससुरोत्तमतीर्थीयटीकं संशोद्धच्च प्रकाशनीयमिति बहुधा प्रायत्यत मया। विफल एव समजनि सर्वोऽपि यत्नः। यदि केनापि पुण्यात्मना तदेतेषु त्रिष्वेकोऽपि ग्रन्थः स्वनिकेतने निगूढं सुरक्षितः, तमस्य शोधनाय च मुद्रणाय च सहक्रियतामिति प्रार्थयामहे ॥

* * *

श्रीहृषीकेशतीर्थीये मूलपाठे प्रणवकल्पः न्यासपद्धतिश्च द्वावपि ग्रन्थौ नोपलभ्येते। अथापि हृषीकेशतीर्थीये लुप्तभागस्य पुनर्लिपिबन्धकरणेन रक्षितवता, तेन शुद्धपाठबद्धादराणां महोपकारं कृतवता, क्रिस्तीये सप्तदशे शतके जीवितवता, श्रीहृषीकेशतीर्थसंस्थानमधिरूढवता श्रीरघुवर्य्यतीर्थेन लिखिते ताळपत्रे दिष्ट्या ओन्तत्सत्प्रणवकल्पस्य शुद्धः पाठ उपलभ्यते। महदिदं नः प्रमोदस्थानम् ॥

* * *

न्यासपद्धतिस्तत्रापि न पठ्यते । अथापि कण्वतीर्थे सुब्रह्मण्याह्वयेन लिखिते प्रायो मूलकोशावलम्बिनि प्राचीनकोशे उपलब्ध इति सोऽप्यत्र सङ्गृहीतः। **'पूर्ण्णप्रज्ञेन मुनिना व्यासवाक्यसमुद्धृतिः–'** इत्युपसंहारवाक्येन तस्य मध्वकृतिता निर्ण्णीयते । उल्लेखाच्च सुरोत्तमतीर्थीये । विवृतमेतत् पद्धतिचन्द्रिकायाम्। अथापि ये सन्दिहते तेषां वादिराजश्रीचरणवचनमेव प्रत्युत्तरं भवति–

'पान्त्वस्मानिति पद्यस्य वन्दे वन्द्यमिति स्तुतेः ।
'अन्यथा मध्वकृतितानिर्ण्णयः किङ्कृतस्तव' इति ॥

* * *

अस्य निर्म्माणप्रसङ्ग एवं तर्क्यते– श्रीमध्वः भगवता बादरायणेन सह नरनारायणाश्रमं जगाम। तत्र भगवता नारायणेन कृतसंवादस्तेन प्राप्तानुज्ञः बदरीं प्रत्याययौ । तत्र नरनारायणप्रसङ्गं स्मरन्नेव ग्रन्थमिमं प्रारेभे– **'नरनारायणं नत्वा–'** इति । यथा कोक्कडग्रामे एडपाडित्तायाभिधानं विप्रमनुग्रहीतुं केशवप्रतिमां प्रदाय तदर्थं सङ्गृहीतं कृष्णामृतमहार्ण्णवं केशवप्रार्थनयैव प्रारेभे– **'स मां रक्षतु केशवः'** इति ॥

* * *

अनयोः ओन्तत्सत्प्रणवकल्पस्य न्यासपद्धतेश्च प्रत्नं व्याख्यानं नोपलब्ध-मिति मयैव नूत्नं विरच्य समयोजि, प्रणवकल्पचन्द्रिकेति पद्धतिचन्द्रिकेति च । तेन बुभुत्सूनामुपकारः स्यादित्याशास्महे ॥

भगवत्पादेन प्रणवकल्पे– **'तारतम्यं च संस्मरन्'** (१८) इति सतात्पर्य्य-मुक्तम् । तदर्थमध्येतॄणां सौकर्य्यायात्रान्ते परिशिष्टे तारतम्यमीमांसा च प्रकटिता । **'अतिरक्ततळम्–'** (७–११) इत्यादिभिः पञ्चभिः पद्यैः

प्रणवकल्पे भगवद्रूपध्यानप्रकारश्च न्यरूपि । नारायणपण्डिताचार्यकृता ध्यानमाला चास्यैव विवरणमिव भाति । अतः साऽप्यन्ते निवेशिता । क्षिप्रान्वेषणाय च श्लोकार्द्धानुक्रमणिका च ।।

गणकयन्त्रेणाक्षरसंयोजनं कृतवतः श्रीलस्य कड्डी बदरीनारायणाचार्य्यस्य, मुद्राराक्षसनिरासकर्म्मणि सहकृतवतः श्रीमतः पर्क्कळ वेङ्कटेशबायरी-महोदयस्य, एतद् ग्रन्थप्रकाशकानां द्वैपायनप्रतिष्ठानाधिकृतानाम्, भगवतो बादरायणस्य आचार्य्यमध्वस्य च रमणीयतमं रेखाचित्रं दत्तवतः उक्रयीन (Ukraine) देशवासिनः स्वीकृतश्रीमध्वशिष्यत्वस्य श्रीलस्य उज्ज्वल-नीलमणेः, सुन्दरं मुखपुटं रचितवतः श्री के.एम्. शेषगिरेः, तथा सुन्दरं मुद्रितवतः श्रीकल्याणि श्रीकान्तस्य च सहार्द्दमाशीःपरम्परा-माशास्महे ।।

रजतपीठपुरम् इति भवदीयः

2018 September **—बन्नञ्जेपदोपाह्वः गोविन्दपण्डिताचार्य्यः**



प्रणतवान् प्राणिनां प्राणभूतं
प्रणतिभिः प्रीणये पूर्ण्णबोधम् ।।

श्रीमदानन्दतीर्थभगवत्पादविरचितः

ओन्तत्सत्प्रणवकल्पः

(मूलम्)

*

ओम् ॥ समिच्चर्वाज्यकान् हुत्वा सम्यक् पुरुषसूक्ततः ।
सर्वेषामभयं दत्वा विरक्तः प्रव्रजेद्धरिम् ।
स्मृत्वा भागवतं शुद्धमाचार्य्यं शरणं व्रजेत् ॥ १ ॥

अधीहि भगवो ब्रह्मेत्यस्मै ब्रूयाद् गुरुः परम् ।
उच्चारयंस्त्रिशस्तारं दक्षिणे श्रवणे तथा ।
ऋषिच्छन्दोदैवतानि ब्रूयात् तस्य क्रमात् सुधीः ॥ २ ॥

अन्तर्य्यामीति गायत्री परमात्मेत्यनुक्रमात् ।
विश्वश्च तैजसः प्राज्ञस्तुरीयश्चाक्षरदेवताः ॥ ३ ॥

कृष्णो रामो नृसिंहश्च वराहो विष्णुरेव च ।
परञ्ज्योतिः परम्ब्रह्म वासुदेव इति क्रमात् ।
अकारादेस्तथा शान्तातिशान्तान्तस्य देवताः ॥ ४ ॥

एवमुक्त्वा तु तद्ध्यानं ब्रूयाद् भक्ताय सद्गुरुः ।
अष्टपत्रे तु हृत्पद्ममद्ध्ये सूर्य्येन्दुवह्निगम् ।
पीठं तन्मद्ध्यपद्मस्थं नारायणमनामयम् ॥ ५ ॥

उद्यदादित्यसङ्काशं तेजसाऽनुपमं सदा ।
सहस्रेणापि सूर्य्याणां सज्ज्ञानानन्दरूपिणम् ॥ ६ ॥

अतिरक्ततळं भास्वन्नखव्रातविभूषितम् ।
वृत्तजङ्घं वृत्तजानुं हस्तिहस्तोरुमीश्वरम् ॥ ७ ॥

महाकटितटाबद्धकाञ्चीपीताम्बरोज्ज्वलम् ।
निम्ननाभिं च त्रिवलिसंवृतोदरबन्धनम् ॥ ८ ॥

विस्तारिवक्षसं भ्राजत्कौस्तुभामुक्तकन्धरम् ।
वनमालाधरं हारवैजयन्त्यादिभिर्य्युतम् ॥ ९ ॥

पृथुदीर्घचतुर्बाहुं शङ्खचक्रगदाम्बुजैः ।
युक्तमुन्निद्रपद्माक्षं स्फुरन्मकरकुण्डलम् ॥ १० ॥

पूर्णचन्द्रायुतोद्रिक्तकान्तिमन्मुखपङ्कजम् ।
सुभ्रुवं सुललाटान्तं किरीटाबद्धमूर्द्धजम् ।
निःशेषदुःखशमनं नित्यानन्दं शुचिस्मितम् ॥ ११ ॥

विश्वादींश्चैव कृष्णादीनेवम्भूतान् सनातनान् ।
अभिन्नानेव सततं तस्माद् विष्णोः परात्मनः ।
वराभयोद्यतकरान् नित्यानन्दैकरूपिणः ॥ १२ ॥

एवमुक्त्वा गुरुर्द्ध्यानं शपथं कारयेत् ततः ।
न विष्णुं वैष्णवांश्चैवाप्युत्सृजेयमिति त्रिशः ॥ १३ ॥

नचान्यदेवसामान्यं तदैक्यमथवा हरेः ।
चिन्तयेयं मृतौ वाऽपि नचाप्येकत्ववादिभिः ॥ १४ ॥

समत्ववादिभिर्वाऽहं सङ्गच्छेयं कदाचन ।
तन्निन्दकैश्च तद्भक्तनिन्दकैर्वा महामुने ॥ १५ ॥

एवं कृते तु शपथे मस्तके हस्तपङ्कजम् ।
निधायोत्तीर्य्य संसारात् सुखी भव हरेः प्रियः ॥ १६ ॥

सर्वदुःखादिभिर्म्मुक्तो नित्यानन्दैकरूपकः ।
सम्प्राप्य विष्णुसामीप्यं तत्रापि हरिभक्तिमान् ॥ १७ ॥

भक्तिमांश्चाथ देवेषु तारतम्यं च संस्मरन् ।
सर्वोत्कर्षं स्मरन् विष्णोर्भूयाश्चैव सदा सुखी ॥ १८ ॥

न मुक्तौ विष्णुनैक्यं वा मुक्तानां साम्यमेव वा ।
स्मरेथा इति चोक्त्वा तत्समयाननुशिक्षयेत् ॥ १९ ॥

नित्यशश्च हरेः पूजा जपद्ध्यानसपर्य्यया ।
कर्त्तव्यैव त्वया वत्स जपश्च त्रिसहस्रकः ॥ २० ॥

मद्ध्यमः प्रणवस्योक्तो योऽवरः स सहस्रकः ।
त्रिसहस्रात् परो यस्तु स उत्तमजपः स्मृतः ॥ २१ ॥

आत्मानं प्रतिबिम्बत्वे द्ध्यायन् बिम्बं जनार्द्दनम् ।
द्ध्यायस्व सततं पुत्र सपर्य्यां नित्यशः कुरु ।
मानसेनाथ पुष्पैर्वा प्रणवेन समाहितः ॥ २२ ॥

अन्यांश्च वैष्णवान् मन्त्रान् जपेथा भक्तिपूर्वकम् ।
शृणुष्व वैष्णवं शास्त्रं सदा वेदार्त्थतत्परः ॥ २३ ॥

वेदान् मन्त्रानुपनिषत्सहितान् सर्वदा शृणु ।
इतिहासपुराणे च पञ्चरात्रं तथैव च ॥ २४ ॥

तदर्थान् ब्रह्मसूत्रैश्च सम्यङ् निर्णीय तत्वतः ।
विष्णोः सर्वोत्तमत्वं तु सर्वदा प्रतिपादय ॥ २५ ॥

॥ इति श्रीमदानन्दतीर्थभगवत्पादविरचितः
ओन्तत्सत्प्रणवकल्पः समाप्तः ॥

—०—

ओन्तत्सत्प्रणवकल्पः

गोविन्दपण्डिताचार्य्यविरचितया
प्रणवकल्पचन्द्रिकया सहितः

*

प्रणवकल्पचन्द्रिका

ओम् ॥ ओन्तत्सदितिनामानं समिच्चर्वाज्यकैर्हुतम्।
सम्यक् पुरुषसूक्तेड्यमष्टमूर्त्तिं हरिं नुमः ॥ ❊ ॥

ओन्तत्सत्प्रणवकल्पाख्यं दशाप्रमतिनिर्म्मितम्।
दशाप्रमतिमानम्य व्याकरिष्ये यथामति ॥ ❊ ॥

अण्वपि रत्नं प्रत्नमनर्घं भवति तद्गुणेक्षाणाम्।
विपुले सत्यपि काचे किं सन्तस्तमपि कचेषु दधीरन् ॥ ❊ ॥

अथात ओन्तत्सत्प्रणवकल्पं व्याख्यास्यामः। अणुरपि ग्रन्थरत्नराजोऽय-मेतावन्तं महान्तमनेहसं न विवृतः, मूलसारस्यमजानद्भिः यतिप्रणवकल्प इति नामव्यत्ययेन विकृतः, अनुष्ठाने विस्मृतप्रायश्चेति तदर्थाविष्करणाय प्रयत्यते यथाशक्ति ॥

ओ३म् ॥ समिच्चर्वाज्यकान् हुत्वा सम्यक् पुरुषसूक्ततः।
सर्वेषामभयं दत्वा विरक्तः प्रव्रजेद्धरिम्।
स्मृत्वा भागवतं शुद्धमाचार्य्यं शरणं व्रजेत् ॥ १ ॥

'समिच्चर्वाज्यकान्' इति भगवतोऽपूर्वनामत्रयस्मरणेनैव ग्रन्थारम्भे मङ्गलमाचचार ॥

ओमिति तदिति सदिति त्रीणि नामानि यस्य तत् त्र्यक्षरप्रतिपाद्यं त्रिवेदवेद्यं नारायणाख्यं परं ब्रह्म प्रणुवन्तीति प्रणवा ओङ्काराद्या वैष्णवमन्त्राः ।

मुख्यतश्च प्रणव ओङ्कारः। तस्य तेषां च जपध्यानादिकल्पः यत्र निरूप्यते स ग्रन्थः ओन्तत्सत्प्रणवकल्पः। कल्प इति विधानं च विधायकं च शास्त्रम्। 'कल्पः शास्त्रे विधौ न्याये' इति मेदिनी। कल्पतरुरिव सर्वाभीष्ट-प्रदश्चायं भिक्षुतया जिजीविषूणाम् ॥

ओमिति तदिति सदिति त्रीण्यक्षराणि। प्रणव इति च त्रीण्यक्षराणि। व्याहृतयश्च तिस्रः। ओमित्यकारो भूः। तदित्युकारो भुवः। सदिति मकारः स्वः। निर्दोषत्वात् प्र। आनन्दत्वाण्णः। ज्ञानरूपत्वाद् वः। सच्चिदानन्द इत्येतत्। आप्नोति सर्वं व्याप्नोतीत्यः। अवतीत्योम्। अव व्याप्तौ। सर्वत्र भवतीति भूः। तदिति गायत्र्याः समाहारः। परोक्षतया अन्तर्मनसि ततत्वात् तत्। अन्तरुत्कर्षणादुः। मानसं भुञानो वसति मनसीति भुवः। अन्तर्गतेर्मः। बाह्यज्ञानस्य सादनात् सत्। स्वरूपानन्द-मनुभावयतीति स्वः ॥

समिन्धनात् समित्। अन्तश्चरणात् चरुः। केवलानन्दानुभवेन आज्याय-स्त्वादाज्यम् ॥

समिदिति स्त्रीलिङ्गपदम्। तेन स्त्रीरूपाण्याह स्त्रीगतानि। तानि हि समिन्धते। ञि इन्धी दीप्तौ। चरुरिति पुंल्लिङ्गं पदम्। तेन पुरुषरूपाण्याह पुङ्गतानि। पुरुषो हि पुरु चरति। पुरु सरतीति हि पुरुषः। आज्यमिति नपुंसकलिङ्गम्। तेन उभयगतः, विश्वादिर्भगवानाज्यम्। आ समन्तात् स्त्रियः पुंसश्च अजति यमयति चेत्याज्यम् ॥

तेन त्रिविधहोमेन त्र्यक्षरः सर्वरूपो भगवान् हुतो भवति। समिदिति चरुरिति आज्यमिति कायन्ति गायन्त्येतानिति समिच्चर्वाज्यकाः भगवद्रूपविशेषाः। समिच्चर्वाज्यनामकान् प्रति समिच्चर्वाज्यकैर्हुत्वा ॥

समिद्भिः षोळशाहुतयः । चरुणाऽऽज्येन च । षोळशकलस्य पुरुषस्य प्रीणनार्त्थम् । बह्वृचानामिदम् । याजुषाणां पुनरष्टादशाऽहुतयः । षोडशकलागतस्य प्रकृतिगतस्य स्वतः पुरुषस्य च । समतीतक्षराक्षरस्य नारायणस्येत्येतत् ॥

पुरुषसूक्तस्य वेदसारत्वात् सर्वैर्वेदमन्त्रैर्हुतो भगवान् । पुरुष इति च त्रीण्यक्षराणि । बृहतीसहस्रे त्रीण्यपि पृथङ्नामत्वेन पठ्यन्ते पु इति रु इति ष इति ॥

बाह्यार्थान् पूरयन् पु इति विश्वः । अन्तर्म्मनसि रुन्ध इति रु तैजसः । जीवेन सह सीदन् ष इति प्राज्ञः । शेते सस्त इति वा । षस स्वप्ने ॥

हुत्वेति प्रत्यक्षरं भगवन्तमाहूय प्रतिमन्त्रं आहुतिं हुत्वा ॥

सम्यगिति भगवानेव पुरुषसूक्तमुख्यार्थः, तन्महिमविस्तरार्त्थं सृष्ट्यादि-कथनमित्यनुसन्धाय ॥

'अभयं सर्वभूतेभ्यो मत्तः स्वाहा' इति त्रिरुपांशु, त्रिरुच्चैरुच्चारणेन च **सर्वेषामभयं दत्वा** । विस्तरस्तु विष्णुतीर्थीये ॥

प्रायः सर्वेषु दानेषु स्वत्वत्यागो नियतः । अभयदाने तु न स्वत्वत्याग इति न तेषां सम्प्रदानत्वमिति सर्वेषामित्याह । अत एव दत्वा, न तु सम्प्रदाय ॥

प्रव्रजेत् चतुर्त्थाश्रमी भवेदित्यर्थः । 'अनाशकी प्रव्रजितः कर्म्मन्दी मस्करी यती' इति यादवप्रकाशाचार्य्यः । प्रकृष्टं परमात्मानं व्रजेदित्यर्थः । प्रकर्षेण व्रजनं नाम सर्वप्रकारेण स्वात्मनिवेदनम्, चरमावस्था भक्तेः ॥

कदा प्रव्रजेत्? यदा **विरक्तः** । विष्णौ रक्तः इतरत्र विगतरागः ॥

'यदहरेव विरजेत् तदहरेव प्रव्रजेत्' इति श्रुतिः। विवृतमेतन्नरहरितीर्त्थैः– 'हरौ विशिष्टरागः अन्यत्र विगतरागो भवेदित्यर्थः' इति। 'वि' इति विष्णुः। 'अकयप्रविसंभूमसखहा विष्णुवाचकाः' इति ह्यभिदधति॥

हरिमित्युत्तरान्वयि– **हरिं स्मृत्वे**ति। सदा स्मरणशीलोऽपि प्रव्रजनकाले विशेषतः **हरिं स्मृत्वा**॥

कुतो हरिमेव स्मृत्वा? संसारभयं हरतीति हि हरिः। आचार्य्यः मन्त्रोपदेष्टा सम्प्रदायप्रदश्च। 'मन्त्रव्याख्यादिनाऽऽचार्यः' इतियादवप्रकाशाचार्य्यः। न केवलं वचनेन किन्त्वाचरणेनैव यः शिष्यान् ग्राहयति स आचार्य्यः। कीदृश**माचार्य्यम्? भागवतम्**। भगवति विष्णौ भक्तिमन्तम्। भगवानेक एव सर्वोत्तम इति निश्चयवन्तम्। आचारतः **शुद्धं** च। भागवतमिति ज्ञानशुद्धिमाह। शुद्धमिति कर्म्मशुद्धिम्। एतेन ज्ञानकर्म्मणोः समाहार-माह। **शरणमा**त्मनः सर्वात्मना आश्रय इति तं **व्रजेत्** सभक्ति-श्रद्धमुपतिष्ठेतेत्यर्थः। तदुक्तम्– 'तद् विज्ञानार्थं स गुरुमेवाभिगच्छेत् समित्पाणिः श्रोत्रियं ब्रह्मनिष्ठम्' (आथ.१.२.१२) इति। षट्पदेय-मनुष्टुप्। जागतं छन्दः॥ ❋॥

अधीहि भगवो ब्रह्मेत्यस्मै ब्रूयाद् गुरुः परम्।
उच्चारयंस्त्रिशस्तारं दक्षिणे श्रवणे तथा।
ऋषिच्छन्दोदैवतानि ब्रूयात् तस्य क्रमात् सुधीः ॥ २॥

कथं शरणव्रजनम्? आह– '**अधीहि भगवो ब्रह्म**' इति वदन् **शरणं व्रजेत्**। तथाहि तैत्तिरीयश्रुतिः– 'भृगुर्वै वारुणिः। वरुणं पितरमुप ससार। अधीहि भगवो ब्रह्मेति'(३.१) इति। अनेनेदमुदितं भवति– अनेन मन्त्रेणैवोपसरणं शिष्येण कर्त्तव्यम्। नतु तत्समानार्थकेन येन केनचित् स्ववाक्येनेति॥

ब्रह्मेति परं ब्रह्म । ब्रह्मेति वेदः । ब्रह्मेति प्रणवः । तदधीहि अद्धयापय व्याख्याहीत्यर्थः । **भगवः** भगवन्, भगवज्ज्ञानिन् गुरो । 'मतुवसो रु सम्बुद्धौ छन्दसि' (अ.सू.८.३.१) । **अस्मै** उपसन्नाय शिष्याय **गुरुः परं** ब्रह्म **ब्रूयात्** । परं मन्त्रं प्रणवं च ब्रूयादुपदिशेत् ॥

कथं ब्रूयात्? उपसन्नस्य **दक्षिणे श्रवणे तारं** प्रणवं **त्रिश उच्चारयन्** । संसारात् तारयतीति तार ओङ्कारः । तथा तद्वदेव दक्षिणे श्रवणे, **तस्य** तारस्य, तस्य शिष्यस्य वा, **ऋषिच्छन्दोदैवतानि ब्रूयात् क्रमात्** शिरसि ऋषिः, मुखे छन्दः, हृदये दैवतमिति क्रममनुसृत्य । **सुधीः** सम्यगुपासनेन सिद्धमन्त्र इत्यर्थः । इयमपि षट्पदा जगती ॥ ❊ ॥

अन्तर्य्यामीति गायत्री परमात्मेत्यनुक्रमात् ।
विश्वश्च तैजसः प्राज्ञस्तुरीयश्चाक्षरदेवताः ॥ ३ ॥

गायत्रीपदोत्तरमपीतिशब्दोऽनुवर्तते । **अन्तर्य्यामी** ऋषि**रिति दैवी गायत्री** छन्द **इति परमात्मा** दैवत**मिति** । 'दैवतं देवतानां च' इति परदेवता नारायण एव प्रतिपाद्य इत्यनेनाऽह ॥

ननु साध्यनारायणो देवतेति केचिदाचक्षते । नेदं प्राचीनशास्त्रानुगुणमित्याह– **अनुक्रमात्** । शास्त्रानुगुणः क्रमःअन्तर्य्यामी ऋषिरिति । 'एष त आत्माऽन्तर्य्याम्यमृतः' इति हि श्रुतिः । तेनैव क्रमेण युक्तं वचनमिति । देवतैवात्र ऋषिरपीति । 'ऋषिश्च देवतैकोऽहम्' इति तन्त्रसारवचनम् । साध्यनारायण इति चान्तर्य्याम्येवोच्यते ॥

अथ माण्डूकोक्तं चतुरक्षरोपासनमाह– **विश्वश्च** । **तुरीयः** नादाख्यस्याक्षरस्य देवता । कथं नादोऽक्षरम्, एकपञ्चाशद्वर्णेभ्योऽन्यत्वात्? सत्यम् ।

नायमेकपञ्चाशति प्रविष्टः। अधिकमिदमक्षरं शास्त्रेषूदितम्। एतत्सूचनायैव तुर्य इति वक्तव्ये **तुरीय** इत्यधिकाक्षरं पादं निबबन्ध । अर्थवत्तया उच्चार्य्यमाणत्वादक्षरम्। पृथगुच्चाराभावान्नाक्षरेषु गणना। तथाहि वामन-पण्डितः– 'अकारोकारमकाराणां श्लिष्टोच्चारणसमये योऽयं ध्वनिः श्रूयते तद्वाच्यत्वात् तुरीयो नादनामा' इति ॥

'तुरीयं नादनामानं हरिं ज्ञात्वा परं पदम्।
'तमेव प्रविशेच्छुद्धरूपी तत्सदृशात्मवान्'
इत्यात्मसंहितावचनम्॥ ❋ ॥

कृष्णो रामो नृसिंहश्च वराहो विष्णुरेव च।
परञ्ज्योतिः परम्ब्रह्म वासुदेव इति क्रमात्।
अकारादेस्तथा शान्तातिशान्तान्तस्य देवताः ॥ ४ ॥

अथाक्षरोपासनमाह– **कृष्णो रामो नृसिंहश्च**। अष्टाक्षरत्वादेव चेयं गायत्री । अथाप्येकाक्षरत्वाद् दैवी । देवस्य नारायणस्य विशेषतः प्रियेति ॥

अकार आदिः यस्य प्रणवस्य सोऽकारादिः । तथेत्यनुक्तसमुच्चये । उकारमकारनादबिन्दुकलामद्ध्यस्य । **तथा** शान्तातिशान्तावन्तौ यस्य तस्याष्टाक्षरस्य कृष्णाद्या अष्टौ **क्रमाद् देवताः**। तथाहि– अकारस्य कृष्णः। उकारस्य रामः। मकारस्य नृसिंहः। नादस्य वराहः। बिन्दो-र्विष्णुः । कलायाः परञ्ज्योतिः । शान्तस्य परम्ब्रह्म । अतिशान्तस्य वासुदेव इति। सन्न्यासिनां विशिष्टोपासनमिदम्॥

अत्र किञ्चिदपूर्वं प्रमेयमवधेयमस्ति । दशस्ववतारेषु जयविजययोः शापोद्धारार्थमेव धृतानां चतुर्णामेव रूपाणामत्रोल्लेखः। हिरण्याक्षवधाय

वराहः । हिरण्यकशिपोर्नृसिंहः । रावणकुम्भकर्ण्णयो रामः । शिशुपाल-दन्तवक्रयोः कृष्ण इति ॥

एतेन भगवत्प्राप्तिप्रतिबन्धकयोरसुरयोः संहारेण, जातशुद्धरूपयोः जय-विजययोः सहकारेण भगवतोऽन्तरङ्गदर्शनं सुकरमित्युदितम् । अत एतानि चत्वार्य्येव रूपाणि स्वकर्म्मन्दिशिष्याणामुपासनार्थं भगवत्पादो ददौ । तेन जयविजयावासुरभावात् तारयतीति तारो हरिः । 'अशोक-स्तारणस्तारः' इति, 'भूर्भुवःस्वस्तरुस्तारः' इति च भारते ॥

हृषीकेशतीर्थस्य पद्मनाभतीर्थस्य च रामः । उकारोपासकावेतौ । द्वौ काळियमथनौ कृष्णौ नरहरितीर्थजनार्दनतीर्थयोः । विट्ठलात्मा गोपालकः कृष्णः उपेन्द्रतीर्थस्य, वामनतीर्थस्याधोक्षजतीर्थस्य च । अकारोपा-सकाः पञ्चाप्येते । नृसिंहो रामतीर्थस्य । मकारोपासकोऽयम् । वराहो विष्णुतीर्थस्य । यो मध्वशिष्येषु नादोपासकः सन् सर्वाधिकः प्रणवोपा-सकः ॥

यद्यपि **कृष्णो रामो नृसिंहो वराह** इति **च विष्णुरेव** । अथापि रूपविशेष-विवक्षया चिन्तनमिति ॥

कथमः कृष्णः? अटति व्रजोद्देशात् वृन्दावनम्, ततः पुनर्व्रजम्, ततो मधुराम्, ततश्च द्वारकामिति । द्वारकातो हस्तिनपुरम् । तत इन्द्रप्रस्थम् । एवमटन् अः कृष्णः शिशुपालदन्तवक्त्रौ लीलया अजतीति च । अज क्षेपणे ॥

कथमष्टावक्षराणि? अर्त्थवत्तयोच्चार्यमाणत्वादित्यवादिष्म । अर्त्थस्तु मूले स्फुटमुक्तः । कथमुच्चार्य्यमाणत्वम्? अयमुच्चारणक्रमः– 'मनः कायाग्निमाहन्ति स प्रेरयति मारुतम्' । तेन नाभिमूले योऽतिसूक्ष्मः

कम्पस्तन्मूलो नादश्च समजनि सोऽतिशान्तः । स नादः हृदयमभिप्रसर्पन् ईषदिव स्थूलतामापन्नः शान्तः । ध्यानकाले हृदयेऽनुभूयमानोऽनाहत-ध्वनिः कलेत्युच्यते । शान्तातिशान्तौ परा । इयं पश्यन्ती । ततः कण्ठनाळे उत्पतन् बिन्दुभावमापद्यते सा मद्ध्यमा । ततो नादः अक्षरात्मना व्यज्यते सा वैखरी ॥

कथं राम उः? उग्रः सन् रावणकुम्भकर्णौ जघानेति । कथं मो नरसिंहः? हिरण्यकशिपुं जिहिंसेति । मीङ् हिंसायाम् । मापयति प्रमापयतीति वा मः । कथं नादो वराहः? घुर्-घुरिति नदन्नेव हिरण्याक्षं जघानेति ॥ ❊ ॥

एवमुक्त्वा तु तद्ध्यानं ब्रूयाद् भक्ताय सद्गुरुः ।
अष्टपत्रे तु हृत्पद्ममद्ध्ये सूर्येन्दुवह्निगम् ।
पीठं तन्मद्ध्यपद्मस्थं नारायणमनामयम् ॥ ५ ॥

ततो मूर्त्तिध्यानप्रकारमाह– **एवमुक्त्वा त्वि**त्यादिना । कृष्णादीनामका-रादित्वाद्यनुसन्धाने योऽर्थविशेषस्तत्पूर्वकमुक्त्वेति तुनाऽऽह । **भक्ताय** हरौ गुरौ च । सन् ध्यानविधिं विद्वान् **गुरुः** । स्वयं ध्यानेन पश्यन् ब्रूयादित्यर्थः । 'विद्वान् सन् कोविदः सूरिः' इति यादवप्रकाशाचार्य्यः ॥

तलवकारभाष्ये 'यदि सत्पुरुषावश्यम्' इति ब्रह्मपारवचने 'सत्पुरुष निर्दोषपुरुष सर्वज्ञपुरुष' इति वामनपण्डितः ॥

'पद्मकोशप्रतीकाशं हृदयं चाप्यधोमुखम्' इत्युक्तः मांसपिण्डः हृत्पद्म-मुच्यते । अधोमुखस्य तस्य मद्ध्येऽष्टपत्रमूर्ध्वमुखं पद्मम् । अष्टविध-प्रकृतिमानिरमारूपं पद्मं तदिति विशेषं तुनाऽऽह । तत्र **सूर्य्येन्दु-वह्निगं पीठम्** । सूर्य्य इन्दुर्वह्निश्च तत्र गता इति तत् **पीठं सूर्य्येन्दु-वह्निगम्** । सूर्य्येन्दुवह्नीनां मण्डलमित्येतत् । तदेतत् मण्डलत्रयं

भगवत्पीठत्वेन ध्येयमित्यर्थः। तस्य हृत्पद्मस्य मद्ध्ये यदष्टपत्रं रमारूपं पद्मं तत्र स्थितं **नारायणमनामयं ब्रूया**दुपदिशेदित्यन्वयः। आमयं ईषत्प्रधानं न भवतीत्यनामयम्। सर्वोत्तममित्यर्थः। दोषोपलक्षणश्चायमामय-शब्दः। निर्दोषम्। भवरोगरहितं वा। न विद्यत आमयो यस्मादिति वा। स्वयं भवभयान्मुच्येयेति तथा ध्येयम्। चतुर्थपञ्चमयोश्च षट्पदा जगती ॥ ❊ ॥

उद्यदादित्यसङ्काशं तेजसाऽनुपमं सदा।
सहस्रेणापि सूर्य्याणां सज्ज्ञानानन्दरूपिणम् ॥ ६ ॥

उद्यदादित्यसङ्काशं लोकचक्षुषः। अथापि **सूर्य्याणां सहस्रेणापि तेजसाऽ-नुपमम**न्तर्दृष्ट्या। यतः सच्चिदानन्दरूपी सच्चिदानन्दा एव रूपमस्येति। सदिति निर्दोषम् ॥

अतिरक्ततळं भास्वन्नखव्रातविभूषितम्।
वृत्तजङ्घं वृत्तजानुं हस्तिहस्तोरुमीश्वरम् ॥ ७ ॥

भगवत्पादः स्वयं भगवद्रूपं साक्षात्कुर्वन् यथादृष्टं स्पष्टयति पादादि-केशान्तम्– **अतिरक्ततळमि**त्यादिना **शुचिस्मितमि**त्यन्तेन। वर्णनस्य पादादित्वात् तळमिति पादतळम्। पादाधोभागः। 'स्वरूपेऽधस्तलोऽ-स्त्रियाम्' इति यादवप्रकाशाचार्य्यः। अतिप्रशस्तरक्तवर्णोपेतम्। 'अति स्यादधिकार्थोक्तौ प्रशंसायाम्' इति च। भक्तैः पूजितं रक्ततळं वा। भास्वद्भिर्नखसमूहैर्विभूषितम्। पादाङ्गुलीयकादिभिर्विभूषितं च। हस्ति-हस्तसदृक्षोरुम्। ईशानामपि वरम्। समर्थं च दुष्टनिग्रहे ॥ ❊ ॥

महाकटितटाबद्धकाञ्चीपीताम्बरोज्वलम्।
निम्ननाभिं च त्रिवलिसंवृतोदरबन्धनम् ॥ ८ ॥

महती विपुला कटिः । कटितटः कटिप्रदेशः । तत्र आबद्धे काञ्ची-पीताम्बरे । ताभ्यामुज्ज्वलम् । 'आबद्धः पुनरामुक्तः प्रतिमुक्तः पिनद्धवत्' इति च । तिस्रः वलयः नाभेरुपरि मद्ध्यगा रेखाः । ताः यत्र तत् **त्रिवलि** उदरम् । तत्र संवृतं वेष्टितमुदरबन्धनमाभरणविशेषो यस्य । 'ನಡುಪಟ್ಟಿ' इति भाषायाम् । युद्धसन्नाहाय क्रियमाणः परिकरो वा ॥ ✻ ॥

विस्तारिवक्षसं भ्राजत्कौस्तुभामुक्तकन्धरम् ।
वनमालाधरं हारवैजयन्त्यादिभिर्य्युतम् ॥ ९ ॥

विस्तारि विशालम् । 'अनन्तमन्तवदिव भुजयोरन्तरं गतम्' इत्युक्तं भवति । भ्राजता चतुर्मुखात्मकेन कौस्तुभमणिना आमुक्ता पिनद्धा कन्धरा यस्य तम् । 'आपादपद्मं या माला वनमालेति सा मता' इत्यभिदधति । वननीया माला वनमाला । हारैः मुक्तामयैः । 'हारो मुक्तावली स्त्री स्यात् तद्भेदा यष्टिसङ्ज्ञचया । देवच्छन्दः शतं साष्टमिन्द्रच्छन्दः सहस्रकम् । तस्यार्द्धं विजयच्छन्दो हारस्त्वष्टोत्तरं शतम्' इत्यादि च यादवप्रकाशा-चार्य्यः । वैजयन्ती विष्णोरसाधारणो मालाविशेषः । 'वैजयन्ती पताकायां जयन्त्यां केशवस्रजि' इति च । आदिपदेन ग्रैवेयकादयः । 'ग्रैवेयकं कण्ठभूषा लम्बनं तु ललन्तिका । स्वर्ण्णैः प्रालम्बिका' इति च ॥ ✻ ॥

पृथुदीर्घचतुर्बाहुं शङ्खचक्रगदाम्बुजैः ।
युक्तमुन्निद्रपद्माक्षं स्फुरन्मकरकुण्डलम् ॥ १० ॥

पृथवः पीनाः । चतुर्षु बाहुषु शङ्खचक्रगदाम्बुजैर्युक्तम् । चक्रशङ्खगदाम्बुजैर्वा दक्षोर्ध्वबाहुमारभ्य । उभयथाऽपि निर्देशात् । उन्निद्रं विकसितदलम् । मकराकारं कुण्डलं कर्ण्णवेष्टनम् ॥ ✻ ॥

पूर्ण्णचन्द्रायुतोद्रिक्तकान्तिमन्मुखपङ्कजम् ।
सुभ्रुवं सुललाटान्तं किरीटाबद्धमूर्द्धजम् ।
निःशेषदुःखशमनं नित्यानन्दं शुचिस्मितम् ॥ ११ ॥

पूर्ण्णचन्द्राणामयुतम् । असङ्ख्याः पूर्ण्णचन्द्राः । तेभ्योऽप्युद्रिक्ता अतिशयिता कान्तिरस्येति तादृशं मुखपङ्कजं यस्य तम् । यद्यपि लोके न चन्द्रपङ्कजयोः सहयोगः । अथापि भगवन्मुखे उभयोः समागम इत्यद्भुतमेतदित्याह । ज्ञानदृष्ट्या अनन्तपूर्ण्णचन्द्राधिककान्तिमदपि मुखं लोकदृष्ट्या पङ्कजमिव । यद्यपि सहस्रसूर्याधिककान्ति । अथापि सहस्रचन्द्राधिककान्तिशीतलं बाह्यचक्षुषोः पङ्कजमिवाऽसेचनकमित्यर्थः । ललाटान्तः ललाटप्रान्तः । किरीटमाबद्धं पिनद्धं यत्र तादृशा मूर्द्धजाः केशा यस्य तम् । किरीटेन आबद्धं नियन्त्रितं वा । **निःशेषदुःखशमनं नित्यानन्दमिति** भगवतो विशेषणम् । स्मितस्यापि । तद् यथा 'नित्यः सर्वगतः' इत्यत्र नित्यत्वं सर्वगतत्वविशेषणम् । भगवत्पादस्तोत्रेषु कृतं भगवदङ्गवर्ण्णनं चात्रानुसन्धेयम् । विष्णुतीर्त्थीयगतं ध्यानमालागतं च । इयमपि षट्पदा जगती ॥ ❊ ॥

विश्वादींश्चैव कृष्णादीनेवम्भूतान् सनातनान् ।
अभिन्नानेव सततं तस्माद् विष्णोः परात्मनः ।
वराभयोद्यतकरान् नित्यानन्दैकरूपिणः ॥ १२ ॥

विश्वादिचतुर्ण्णां कृष्णाद्यष्टानां च मूलरूपध्यानमतिदिशति– **विश्वादींश्चैव । कृष्णादीन् विश्वादींश्च एवम्भूतानेव ब्रूयादित्यन्वयः । एवम्भूतान्** कमलमद्ध्यस्थितमूलरूपसदृशान् । नहि कृष्णादिरूपाणि द्वापरादिषु जातानीति मन्तव्यम् । यतः सर्वेऽप्यवताराः सदातनाः । तथा श्रुतिगदितत्वात् सनातनाश्च । यतः **तस्मात्** मूलरूपाद् **विष्णोः** अभिन्नाः ।

केवलनित्यानन्दरूपत्वात् । किन्त्वायुधे विशेषमाह– चक्रशङ्खाभ्यां सह गदाम्बुजयोः स्थाने **वराभयोद्यतकरान्** । तदुक्तम्– 'उद्यद्भास्वत्समाभासः चिदानन्दैकदेहवान् । चक्रशङ्खगदापद्मधरो ध्येयोऽहमीश्वरः । लक्ष्मी-धराभ्यामाश्लिष्टः स्वमूर्त्तिगणमध्यगः । मूर्त्तयोऽष्टावभि ध्येयाश्चक्र-शङ्खवराभयैः । युक्ताः प्रदीपवर्ण्णाश्च सर्वाभरणभूषिताः' इति । एवम्भूतान् ध्येयत्वेन ब्रूयादिति पूर्वेणान्वयः ॥

अत्र किञ्चिदपूर्वं चिन्तनीयमस्ति । अवयविध्यानमिति सर्वत्र समानम् । क्वचिदवयवध्यानमपि भवति । तद्यथा– वृत्तजानुम् । वृत्तजानुं भगवन्तं ध्येयत्वेन ब्रूयात् । भगवतो वा वृत्तं जानुम् । एवमतिरक्ततळमिति, वृत्तजानुमिति, हस्तिहस्तोरुमिति, निम्ननाभिमिति, पूर्ण्णचन्द्रेत्यादिकं च उभयथाऽपि शक्ययोजनम् । तेन भगवत्पादोऽवयवावयविनोर्भेदाभाव-माह । तेनेश्वरमित्यप्युभयविशेषणम् । भगवानपीश्वरः । भगवदवयवा अपीश्वराः । इयमपि षट्पदा जगती ॥ ❋ ॥

एवमुक्त्वा गुरुर्ध्यानं शपथं कारयेत् ततः ।
न विष्णुं वैष्णवांश्चैवाप्युत्सृजेयमिति त्रिशः ॥ १३ ॥

गुरुः एवं ध्यानप्रकार**मुक्त्वा ततः** शिष्येण **त्रिशः शपथं** प्रतिज्ञां **कारयेत्** । **तत** उपदेशानन्तरम् । **ततः** तेन शिष्येण । शपनप्रकारमाह– **न विष्णुमि**त्यादिना, **महामुने** इत्यन्तेन सार्द्धद्वाभ्यां श्लोकाभ्याम् । **चापी**ति परस्परसमुच्चये । अथवा **वैष्णवांश्च** इति चकारेण वैष्णवानां विष्णुप्रियत्वेनाऽधिक्यमाह । 'समुच्चये तथाऽऽधिक्ये न्यूनत्वे चः प्रयुज्यते' इति ह्यभिदधति । **नैव उत्सृजेयमि**त्यन्वयः ॥ ❋ ॥

नचान्यदेवसामान्यं तदैक्यमथवा हरेः ।
चिन्तयेयं मृतौ वाऽपि नचाप्येकत्ववादिभिः ॥ १४ ॥

समत्ववादिभिर्वाऽहं सङ्गच्छेयं कदाचन ।
तन्निन्दकैश्च तद्भक्तनिन्दकैर्वा महामुने ॥ १५ ॥

हरेः अन्यदेवैः समानत्वम् । **अथवा** तैरेकत्वं च **नच** नैव **चिन्तयेयम्, मृतौ वाऽपि** । ऐक्यमङ्गीकुरु न चेत् म्रियस्वेति दुष्टराजादिभिः प्रतिरोधेऽपि । **मृतौ वाऽपी**ति देहल्यां दीपः । **एकत्ववादिभिः** सर्वदेव**समत्ववादिभिर्वा** नैव **मृतावपि सङ्गच्छेयम्** सङ्गच्छेय । बिन्दुरवधारणे । विष्णुनिन्दकैः वैष्णवनिन्दकैर्वा **कदाचन मृतावपि** नैव **सङ्गच्छेयमि**ति । **महामुने** इति गुरुं सम्बोध्य प्रतिज्ञा करणीया । मुख्यतः महामुनिरिति प्रणवोपासनेन जातापरोक्ष उच्यते ॥ ❊ ॥

एवं कृते तु शपथे मस्तके हस्तपङ्कजम् ।
निधायोत्तीर्य्य संसारात् सुखी भव हरेः प्रियः ॥ १६ ॥

सर्वदुःखादिभिर्म्मुक्तो नित्यानन्दैकरूपकः ।
सम्प्राप्य विष्णुसामीप्यं तत्रापि हरिभक्तिमान् ॥ १७ ॥

एवं कृतप्रतिज्ञस्य शिष्यस्य **मस्तके** गुरुः **स्वहस्तपङ्कजं निधाय** । मन्त्रसिद्धस्य गुरोर्हस्तेन शिरसि शक्तिपाते सति देहान्तर्मधुरं शैत्यमनुभूयत इति पङ्कजपदेनाऽह । **इति चोक्त्वा** वैष्णव**समयाननुशिक्षयेदि**त्येकोनविंशपद्येनान्वयः । किमुक्त्वा? **हरेः प्रियः** सन् **संसारादुत्तीर्य** नित्य**सुखी भव** । मोक्षानुभवप्रकारमाह– **सर्वदुःखादिभिर्म्मुक्तः** । आदिना सांसारिकाः सुखानुभवाश्च । पत्नीपुत्रादिभिर्म्मुक्तः । केवलनित्यानन्दरूपः । नित्यानन्दस्य भगवदानन्दापेक्षया कणोपमत्वं कनाऽऽह । **तत्रापि** मुक्तावपि **हरिभक्तिमान्** इति स्वरूपकथनम्, न तु भवेत्यादेशः ॥ ❊ ॥

भक्तिमांश्चाथ देवेषु तारतम्यं च संस्मरन् ।
सर्वोत्कर्षं स्मरन् विष्णोर्भूयाश्चैव सदा सुखी ॥ १८ ॥

मोक्षपर्यन्तं साधनप्रकारमाह– **अथ** आदेशानन्तरं साधने प्रवृत्तः **तारतम्यं** समीचीनतया **स्मरन्** तदानुगुण्येन **देवेषु** ब्रह्मादिषु **भक्तिमान्** सन् । भगवति परा भक्तिः । **अथ** तदनन्तरं **देवेषु च भक्तिमान्** । तदनुगुणा च तेषु भक्तिः । अथ गुरौ च भक्तिमानिति च । **तेषां तारतम्यं च संस्मरन्** इति वा । **देवेषु च भक्तिमान्** । विष्णोस्तारतम्यान्तगतत्वेन **सर्वोत्कर्षं च सदा स्मरन्** मुक्तः सन् **सदैव सुखी भूयाः** ॥ ❊ ॥

न मुक्तौ विष्णुनैक्यं वा मुक्तानां साम्यमेव वा ।
स्मरेथा इति चोक्त्वा तत्समयाननुशिक्षयेत् ॥ १९ ॥

साधकेन किं स्मर्तव्यमित्युक्तम् । अथ किं न स्मर्तव्यं तदाह– **न मुक्तौ** । साधनदशायां कस्याप्यसद्विदुषः सहवासेन **मुक्तौ विष्णुनैक्यं** स्यादिति **वा** मुक्ताः समानाः सर्व इति वा नैव कदाऽपि **स्मरेथाः** । स्मरणमिह चिन्तनम् । स्मृ चिन्तायाम् । तथा स्मरणेन आत्मगामि फलं तम इत्यात्मनेभाषा । इति चोपदिश्य, **तत्समयान्** वैष्णवाचारान्, तेषां यतीनामाचारान् वा । समयः सम्प्रदायः । 'समयस्तु क्रियाकारे सङ्केते चरिते सताम् । सिद्धान्ते' इति यादवप्रकाशाचार्य्यः । शास्त्रानुगुणं शिष्य-योग्यतानुगुणं **च शिक्षयेत्** ॥ ❊ ॥

नित्यशश्च हरेः पूजा जपद्ध्यानसपर्य्यया ।
कर्त्तव्यैव त्वया वत्स जपश्च त्रिसहस्रकः ॥ २० ॥

मद्ध्यमः प्रणवस्योक्तो योऽवरः स सहस्रकः ।
त्रिसहस्रात् परो यस्तु स उत्तमजपः स्मृतः ॥ २१ ॥

प्रणवादिमन्त्रजपेन, मन्त्रदेवताद्ध्यानेन, **सपर्य्यया** षोडशोपचारादिना परिचरणेन **नित्यशश्च हरेः पूजा कर्त्तव्यैव** । चकारेण शौचं तपस्तुष्टिः । प्रणवस्य **जपश्च त्रिसहस्रकः मद्ध्यमः । सहस्रकः अवरः । त्रिसहस्रात् परस्तु उत्तमजपः** । षट्पदा जगती ॥ ❊ ॥

आत्मानं प्रतिबिम्बत्वे द्ध्यायन् बिम्बं जनार्द्दनम् ।
द्ध्यायस्व सततं पुत्र सपर्य्यां नित्यशः कुरु ।
मानसेनाथ पुष्पैर्वा प्रणवेन समाहितः ॥ २२ ॥

ध्यायन् ध्याने पश्यन् । तमेव **सततं ध्यायस्व** चिन्तय । तेन फलमात्मगामि मोक्षाख्यम् । जननमर्दयन् हि स जनार्दनः । **सपर्य्यां** पूजां बाह्यां मानसीं च । **मानसेन** अहिंसादिपुष्पेण । तथाहि पठन्ति–

'अहिंसा प्रथमं पुष्पं पुष्पमिन्द्रियनिग्रहः ।
'सर्वभूतदया पुष्पं क्षमापुष्पं विशेषतः ॥
'ज्ञानपुष्पं तपःपुष्पं ध्यानपुष्पं च सप्तमम् ।
'सत्यं चैवाष्टमं पुष्पमेभिस्तुष्यति केशवः' इति ॥

रीत्यन्तरं च भावप्रकाशिकायाम्–

'अहिंसा सत्यमस्तेयं ब्रह्मचर्यापरिग्रहौ शौचं तुष्टिः सर्वसमर्पणमित्यष्टौ भावपुष्पाणि' इति ।

अथवा बाह्य**पुष्पैः** । **समाहितः** भगवत्येव निहितचेताः । **नित्यशः प्रणवेन सपर्यां कुरु** । बाह्यपूजां मानसपूजां च **नित्यशः** नियततया । इयमपि षट्पदा जगती ॥ ❊ ॥

अन्यांश्च वैष्णवान् मन्त्रान् जपेथा भक्तिपूर्वकम् ।
शृणुष्व वैष्णवं शास्त्रं सदा वेदार्थतत्परः ॥ २३ ॥

हरौ **भक्तिपूर्वकम्** । देवेषु च तत्परिवारतया **भक्तिपूर्वकम्** । वेदार्थो भगवान् नारायणः । सदा वेदार्थचिन्तनपरः ॥ ❋ ॥

वेदान् मन्त्रानुपनिषत्सहितान् सर्वदा शृणु ।
इतिहासपुराणे च पञ्चरात्रं तथैव च ॥ २४ ॥

वेदानां मन्त्रभागान् आरण्यकब्राह्मणोपनिषत्सहितान् । सर्वसारत्वा-दुपनिषदां मुखतो ग्रहणम् । इतिहास इति भारतं मूलरामायणं च । यथा इतिहासपुराणे समग्रतः प्रमाणभूते तथैव **पञ्चरात्रं** चाखिलं प्रमाणम् । तान्येतानि सर्वदा शृणु भगवत्प्रीत्यर्थम् । तदुक्तं ब्रह्माण्डे–

'ऋगाद्या भारतं चैव पञ्चरात्रमथाखिलम् ।
'मूलरामायणं चैव पुराणं चैतदात्मकम् ।
'ये चानुयायिनस्त्वेषां सर्वे ते च सदागमाः' इति ॥

स्कान्दे च–

'ऋग्यजुःसामाथर्वाश्च भारतं पञ्चरात्रकम् ।
'मूलरामायणं चैव शास्त्रमित्यभिधीयते ।
'यच्चानुकूलमेतस्य तच्च शास्त्रं प्रकीर्तितम्' ॥

'अतोऽन्यो ग्रन्थविस्तारो नैव शास्त्रं कुवर्त्म तत्' इति च ॥ ❋ ॥

तदर्थान् ब्रह्मसूत्रैश्च सम्यङ् निर्ण्णीय तत्वतः ।
विष्णोः सर्वोत्तमत्वं तु सर्वदा प्रतिपादय ॥ २५ ॥

॥ इति श्रीमदानन्दतीर्थभगवत्पादविरचितः
ओन्तत्सत्प्रणवकल्पः समाप्तः ॥

—०—

तेषां निर्ण्णेयग्रन्थानामर्त्थान् निर्ण्णायकैर्**ब्रह्मसूत्रैरेव निर्ण्णीय तत्वतः** याथातत्थ्येन । **सर्वोत्तमत्वं तु** । स एव न्यासिनां मुख्यधर्म्म इति तुनाऽऽह । **सर्वदा प्रतिपादय– इत्यनुशिक्षयेदि**ति पूर्वेणान्वयः ॥ ❊ ॥

इमामाचार्य्यगोविन्दः प्रमृष्टां शब्दतोऽर्थतः ।
वितेने विमलां व्याख्यां विनेयजनवाञ्छया ॥ ❊ ॥

॥ इति गोविन्दपण्डिताचार्य्यस्य कृतिषु
ओन्तत्सत्प्रणवकल्पव्याख्यानं प्रणवकल्पचन्द्रिकाख्यानं समाप्तम् ॥

—o—

श्रीमदानन्दतीर्थभगवत्पादविरचिता

न्यासपद्धतिः

(मूलम्)

*

ओ३म् ।। नरनारायणं नत्वा पूर्ण्णं ब्रह्माक्षरोदितम् ।
यतेराचरणं वक्ष्ये पूर्ण्णं शास्त्रानुसारतः ।। १ ।।

अरुणोदयवेलायामुत्थाय हरिमानसः ।
शौचादिकं यथान्यायं कृत्वा दन्तान् विशोधयेत् ।। २ ।।

कटिशौचं मृदा कुर्य्याच्छुद्ध्यर्थं जलसंस्थितः ।
स्नानं कुर्य्याद् यथोक्तेन विधिना नियतो हरौ ।। ३ ।।

धृत्वोर्ध्वपुण्ड्रं विधिना प्रकल्प्याऽसनमच्युते ।
मनो निवेश्याष्टमन्त्रान् यथाशक्ति जपेच्छुचिः ।। ४ ।।

द्वादशसहस्रावृत्तिपरं ब्रह्माक्षरं जपेत् ।
दण्डोदकं जपस्यान्ते दद्याद् विधिविधानतः ।। ५ ।।

देवतां परमां सम्यक् पूजयेच्च विधानतः ।
भिक्षाकाले विधानेन चरेद् भिक्षाटनं यतिः ।। ६ ।।

अनेकभिक्षाचरणं मुख्यधर्म्मो यतेः स्मृतः ।
त्रिपञ्चसप्तसद्मानि गच्छेन्नातोऽधिकं पुनः ।। ७ ।।

भिक्षाग्रहणकाले तु गृह्णीयाद् दातृतो जलम् ।
भिक्षान्ने तज्जलं प्रोक्ष्य पुनर्ग्राह्यं विदा जलम् ।। ८ ।।

निवेदयेत् तदन्नं तु वारिजस्योदकेन तु ।
प्रोक्ष्य देवाय महते मूलमन्त्रेण वाग्यतः ।
तदन्नं भक्षयेत् स्वस्थो ह्यजवद्धरिमानसः ॥ ९ ॥

त्रिवारमुदकस्नानं यतेः शास्त्रेषु चोदितम् ।
अशक्तस्य यतेः शास्त्रे द्विवारं स्नानचोदना ।
अत्यन्ताशक्तविषये त्वेकं स्नानं स्मृतं बुधैः ॥ १० ॥

वेदान्तशास्त्राभ्यसनं मुख्यधर्म्मो यतेः स्मृतः ।
देवो नारायणो नित्यं सृष्टिस्थित्यन्तकारकः ।
भक्तानां मुक्तिदो नित्यमन्यथाज्ञानिनां तमः ॥ ११ ॥

पूर्ण्णप्रज्ञेन मुनिना व्यासवाक्यसमुद्धृतिः ।
न्यासधर्म्मस्य विषये शुभा सङ्क्षेपतः कृता ॥ १२ ॥

॥ इति श्रीमदानन्दतीर्थभगवत्पादविरचिता
न्यासपद्धतिः समाप्ता ॥

—०—

न्यासपद्धतिः

गोविन्दपण्डिताचार्य्यविरचितया
पद्धतिचन्द्रिकया सहिता

*

ओम् ॥ हरये भवाब्धितरये गुणगणगिरये तमोजुषामरये ।
अभिलप्य नमोवाकं दशधिषणाय तत्प्रियायापि ॥ ❊ ॥

मध्वकृता कृतिरेषा
शब्दतस्तनुतराऽप्यर्थतोऽनल्पा ।
विस्मृतकल्पा विद्वद्भिरपि पुरातनैरहो
तत इयमस्मदुपज्ञं व्याख्यायते यथामतिविभवम् ॥ ❊ ॥

देवं नारायणं नत्वा नरनारायणाश्रमे ।
कृत्वा तदाज्ञां शिरसि बदरीं पुनरागतः ॥ ❊ ॥

योऽरीरचद् बहून् ग्रन्थाननुकम्पावशंवदः ।
स्फुरणाय तदर्थानां तं दशप्रमतिं श्रये ॥ ❊ ॥

अथातो न्यासपद्धतिं व्याख्यास्यामः ॥

भगवति स्वान्तस्य नितरामासा यत्र स न्यासस्तुरीयाश्रमः ॥

सर्वस्वं यद् भगवति न्यस्यते सोऽपि न्यासः । तस्य या पद्धतिः परमार्त्थविद्भिः पतितः पन्थाः यत्र निरूप्यते सोऽयं न्यासपद्धतिर्न्नाम ग्रन्थराजः । न्यासस्य पद्धतिरित्येव वा ॥

केचिदस्य मध्वकृतित्वमेव न मन्यन्ते । ते सप्तत्रिंशदेव मध्वग्रन्था इति भ्रान्ताः । सुरोत्तमतीर्त्थवचनमेव तेषां मोहं निरस्यति । तथाहि विष्णुतीर्त्थकृतसन्न्यासपद्धतिव्याख्यायां तद्वचनम्–

'भगवत्पादकृतप्रणवकल्पन्यासपद्धत्यादौ कात्स्न्र्येन कर्म्म-सम्बन्धिधर्म्माणां स्फुटमप्रतिभानात् भगवत्पादाज्ञामकुटं शिरसि परमादरेण धृत्वा प्रणवकल्पादिविवृतिरूपं श्रीविष्णुतीर्थी-याख्यमद्ध्यायचतुष्टयात्मकं ग्रन्थं निर्म्मम इत्याम्नायः' इति ॥

अथ मङ्गलं ग्रन्थतो निबध्नाति–

ओ३म् ॥ नरनारायणं नत्वा पूर्ण्णं ब्रह्माक्षरोदितम् ।
यतेराचरणं वक्ष्ये पूर्ण्णं शास्त्रानुसारतः ॥ १ ॥

कोऽयं नरनारायणः?

सर्वनरेषु स्थितः धर्म्मतनयतयाऽवतरणे स्वसहजे शेषावतारे नरे विशेषतः सन्निहितः नारायणः । न रीयत इति नरः । री हिंसायाम् । 'नरोऽनाशात् परः स्मृतः' इति च । तेन नरश्चायं नारायणश्च नरनारायणः ॥

इदमिह तर्क्यते– नरनारायणाश्रमे नारायणेन समाज्ञप्तः पुनरपि बदरीमेत्य तत्रेमं ग्रन्थं प्रायः प्रणिनाय । अतो नरनारायणं ग्रन्थादौ सस्मारेति ॥

लोके न्यासधर्ममाचरणेन साधून् शिक्षयितुमेव स्वयं सह नरेण धर्मतनयो नारायणो बभूवेति युक्तं तस्य न्यासपद्धत्यादौ नमनम् ॥

ब्रह्मान्तानां नराणां नारायाश्च रमाया अयमयनमिति च नरनारायणः । तेन रमाऽपि वन्दिता ॥

नराणां नारं निर्दुष्टं ज्ञानमाययतीति बादरायणोऽपि नरनारायणः । **पूर्ण्णं** गुणतः कालतो देशतश्च । अत एव ब्रह्मपदोदितम् । अपिच ब्रह्मशब्दः क्वचिज्जीवेष्वपि पठ्यते । चतुर्म्मुखेऽपि । रमायामपि । अतः पूर्ण्णं ब्रह्मेत्याह । एकाक्षरेण ओङ्कारेणोदितम् । अकारादिभिरेकपञ्चाशदक्षरैरपि

उदितम्। अपौरुषेयत्वादक्षरैः वेदाक्षरैरपि सर्वैरुदितम्। अक्षरपदवाच्यायाः प्रकृतेरप्युदितमुद्गतम्। अतीतमित्येतत्॥

अथ **ब्रह्माक्षरोदितमि**त्येकं पदम्। ब्रह्मेति वेदः। वेदमन्त्राक्षरैरुदितम्। तत्रापि ब्रह्माक्षरं बृहदुक्थम्। बृहतीसहस्रमित्येतत्। विशेषतस्तेनोदितम्। ब्रह्माक्षरमोङ्कारः। मुख्यतस्तेनोदितम्, **नत्वा**। यतेरिति समुदायैकवचनम्। यतित्वस्वीकारविधानं प्रणवकल्पे न्यगादि। इदानीं तस्य नित्यानुष्ठानमिहोच्यते। **पूर्णं** समग्रं यथा भवति तथा। अथापि सङ्क्षेपतः। वाचयिष्यति हि विस्तरेण स्वयमेव स्वानुजेन। **वक्ष्ये**। ब्रूञ् व्यक्तायां वाचि। भगवदाज्ञापालनरूपं फलमात्मगामीत्यात्मनेभाषयाऽऽह। शास्त्रमन्तर्य्यामी। तदाज्ञानुसारतः। वेदाद्यनुसारतश्च॥ ✻॥

अथ यतेराचरणमाह आप्रभातादा सायम्–

अरुणोदयवेलायामुत्थाय हरिमानसः।
शौचादिकं यथान्यायं कृत्वा दन्तान् विशोधयेत् ॥ २॥

यदा अरुण उदेति तस्मिन् काले। 'वेला काले च सीमायाम्' इति मेदिनी। सूर्य्योदयात् चतसृभ्यो घटिकाभ्यः पूर्वमित्यर्थः। तदुक्तम्– 'चतस्रो घटिकाः प्रातररुणोदय उच्यते। यतीनां स्नानकालोऽयं गङ्गाम्भःसदृशः स्मृतः' इति (पाद्म.ब्रह्मखं.१५.३१)। स्वयं सदा हरिमानसोऽपि तदा शयनादुत्थाय विशेषतः हरिं स्मरेदित्यर्थः। हरिपदेन चेदमाह– तापसहरिणा कृतं गजेन्द्रमोक्षादिकं विशेषतः स्मरणीयमिति। शुचित्वसम्पादनी क्रिया शौचम्। पुरीषोत्सर्गः। आदिना तदनन्तरभावीनि हस्तपादस्य मृत्तिकाक्षाळनादीनि। **यथान्यायं** यया देहशुद्धिः समञ्जसा स्यात् तया **कृत्वा दन्तान्** विशेषतः विधिविहितक्रमेण **शोधयेत्**। विधिविस्तरस्तु विष्णुतीर्थीये योगदीपिकायां च॥ ✻॥

कटिशौचं मृदा कुर्य्याच्छुद्ध्यर्थं जलसंस्थितः ।
स्नानं कुर्य्याद् यथोक्तेन विधिना नियतो हरौ ॥ ३ ॥

पुनः **शुद्ध्यर्थं मृदा** जलेन च **कटिशौचं** पायूपस्थशौचं **कुर्य्यात्** । नदी-जले **संस्थितः** । कटिदध्नत्वं संशब्दार्थः । ततः **स्नानं कुर्य्याद् यथा** यथावत् । शास्त्रेषूक्तेन **विधिना** । यथा शास्त्रेषूक्तः, तेन विधिनेति वा । स्वेन च सदाचारस्मृतावुक्तेन । **नियतो हरौ** । नेदं मज्जनं केवलं देह-शोधनार्त्थम् । किन्तु हरेः पूजार्त्थम्, हरिप्रीत्यर्त्थमेव च । सर्व-कर्म्मसु हरिप्रीत्यर्त्थमित्यनुसन्धानं करणीयमित्येवं प्रतिश्लोकमावर्त्तया-मास **'हरिमानसः'** इति, **'नियतो हरौ'** इति, **'अच्युते मनो निवेश्य'** इति ॥ ❋ ॥

धृत्वोर्ध्वपुण्ड्रं विधिना प्रकल्प्याऽसनमच्युते ।
मनो निवेश्याष्टमन्त्रान् यथाशक्ति जपेच्छुचिः ॥ ४ ॥

विधिना येन क्रमेण धारणे ब्रह्मनाड्या ऊर्ध्वमुखत्वं स्यात्, येन मन्त्रेण च धारणीयमित्यादि शास्त्रोक्तेन विधानेन । द्वादशाक्षरेण मूर्द्धनि ब्रह्मनाडीसहस्रारसम्पुटीकरणम् । ततः 'केशवाय नमः' इत्यादिभि-र्द्वादशभिर्म्मन्त्रैः ललाटे तुन्दे हृदये गले तुन्ददक्षपार्श्वे दक्षभुजे गलदक्षभागे तुन्दवामपार्श्वे वामभुजे गलवामभागे कशेरुकामूले गलपृष्ठे च क्रमेण धृत्वा ततः पुनर्द्वादशाक्षरेण सम्पुटीकुर्य्यात् । आदौ सहस्रारस्योद्घाटनम् । तत आज्ञाचक्रस्य जागरणम् । ततो ब्रह्मनाड्या आनाभेराकण्ठमुद्बोधनम् । तुन्दपार्श्वपुण्ड्राभ्यामिडापिङ्गलयोः हृदि संयोजनम् । शक्तिपातोऽयं भुजयोर्न्न स्रवेदिति तत आज्ञाचक्राभिमुखताकरणम् । कशेरुकाया आद्यन्तपुण्ड्रेण च सर्वतो भद्रमूर्ध्वगमनं निष्पाद्य सहस्रारे शेषशक्तिः विवृतफणा स्थिरं तिष्ठेदिति पुनरन्ते सम्पुटीकरणमिति क्रमः ॥

कथं पुण्ड्रम्? पुण्डति कुण्डलिन्याः ऊर्ध्वगमनप्रतिबन्धकं निवारयतीति। पुडि खण्डने। पुण्डे रक्। पुणतेर्वा पुण्ड्रम्। पुण्यत इति। पुण शुभे कर्म्मणि। ऊर्ध्वपदेनेदमाह– यत् केषाञ्चित् तिर्यक्पुण्ड्रधारणम्, यच्च क्वचिन्मठविशेषे स्तनेऽधःपुण्ड्रधारणं तदुभयमपि अधःपातहेतुरिति। ऊर्ध्व-पुण्ड्रेण चोर्ध्वलोकगमनसहकारः। तिर्यक्पुण्ड्रेण तिर्यग्योनिषु जननम्। अधःपुण्ड्रेणाधःपात इति। मूर्धनि द्वादशाक्षरेण वासुदेवस्मरणम्। द्वादश-भिर्नामभिः द्वादशात्मनो भगवतः स्मरणम्। ततो दक्षस्तने 'श्रीवत्साय नमः' इति जगन्मातुः स्मरणेन पुण्ड्रबिन्दुः। वामस्तने 'कौस्तुभाय नमः' इति जीवकलामानिनश्चतुर्मुखस्य स्मरणेन पुनरन्यो पुण्ड्रबिन्दुः। अयमेवाऽ-चार्यसम्मतः पुण्ड्रधारणक्रमः। उदितश्च विष्णुतीर्थादिभिः। मठीयचिह्नतया ऊर्ध्वाधःपुण्ड्रधारणमशास्त्रीयमर्वाचीनं च। वेदाधिकारसिद्ध्यर्थं प्रणवा-दिमन्त्रजपाधिकारसिद्ध्यर्थं चोर्ध्वपुण्ड्रधारणम्। अतः शैवा अप्युपनयने वटोरूर्ध्वपुण्ड्रधारणमिच्छन्ति। इदमुपलक्षणम्– वैष्णवत्वसिद्ध्यर्थे दक्षवामभुजयोः चक्रशङ्खधारणं च। तदेतद् विधिनेत्यनेनैवोपसङ्ग्राह। तदुक्तं ब्राह्मे– 'ये बाहुमूलपरिचिह्नितशङ्खचक्रास्ते वैष्णवाः' इति॥

आसनं प्रकल्प्य तत्रोपविश्य धृतोर्ध्वपुण्ड्रो वा स्यात्। नद्यादितीरे धृतोर्ध्वपुण्ड्रो वाऽऽसनं प्रकल्प्योपविशेत्। बाह्यमासनं चैलाजिन-कुशोत्तरम्। आन्तरं पद्मवीरस्वस्तिकादि। यद् यस्य सुखं तत् तस्याऽ-सनम्। स्थिरसुखत्वमेव चाऽसनकल्पने प्रकर्षः। **अच्युते मनो निवेश्य** मन्त्रदेवतास्वरूपं ध्यात्वैव **अष्टमन्त्रान् जपेदि**त्यर्थः। तथात्वे जपफलेन न च्योतयति। अन्यथा च्योतयतीत्यच्युत इत्याह। **यथाशक्ति** दशतोऽन्यूनं यावता मन्त्राक्षराणां द्वासप्ततिसहस्राणि भवन्ति ततोऽनधिकम्। गायत्री

एकस्मिन् दिने त्रीणि सहस्राणि । अष्टाक्षरः नव सहस्राणि इत्यादि । बाह्यान्तः**शुचिः** । अन्तःशौचं द्ध्येयस्वरूपादचलनं मनसः । धावनेन तेजितं वस्त्रम्, परिधूतोऽवस्करः परिमृष्टश्च परिसरो बाह्यम् ॥

अथाष्टमहामन्त्राः– प्रणवः, व्याहृतयः, नारायणाष्टाक्षरः, वासुदेव-द्वादशाक्षरः, विष्णुषडक्षरः, पञ्चाशदक्षरः मातृकामन्त्रः, गायत्री, पुरुष-सूक्तमिति । तथाह्युक्तम्–

'ताराष्टवर्ण्णौ द्विषडक्षरोऽन्यः षडक्षरो व्याहृतयः क्रमेण ।
'पञ्चाशदर्ण्णा सवितुश्च पत्नी पुंसूक्तमित्येव च मूलमन्त्राः ॥
'सन्द्ध्यासु जप्या इम एव मन्त्रास्तारो यतीनां प्रथमो हि मन्त्रः ।
'सावित्रपूर्वास्तु तथाऽपरेषां द्विजन्मनो शश्वदनिन्दितानाम्' इति ॥

॥ ❊ ॥

द्वादशसहस्रावृत्तिपरं ब्रह्माक्षरं जपेत् ।
दण्डोदकं जपस्यान्ते दद्याद् विधिविधानतः ॥ ५ ॥

तत्राष्टमहामन्त्रेषु यतीनां **ब्रह्माक्षरं** प्रणवं **द्वादशसहस्रावृत्ति**परमं **जपेत्** । 'त्रिसहस्रात् परो यस्तु स उत्तमजपः स्मृतः' इति चोक्तं प्रणवकल्पे । स पूर्वावधिः । अयमुत्तरावधिः । **जपस्यान्ते दण्डोदकं दद्याद्** गुरुपरम्परायां यो विधिरुपदिष्टः तद्विधानतः ॥ ❊ ॥

देवतां परमां सम्यक् पूजयेच्च विधानतः ।
भिक्षाकाले विधानेन चरेद् भिक्षाटनं यतिः ॥ ६ ॥

परमां देवतां नारायणम् । **सम्यक्** भक्तिपूर्वकम् । तन्त्रसारोक्त-**विधानतः** । विवृतं चैतत् विष्णुतीर्थीये योगदीपिकायां च । लाभेऽलाभे

च निर्विकारतया भिक्षार्थमटनं **भिक्षाटनम्** । भिक्षेति याचना । याचनया लब्धमन्नादिकं च । 'भिक्ष याच्ञायामलाभे लाभे च' इति धातुपारायणिकाः । 'तत्तद्देशप्रसिद्धार्थानां पृथङ् निर्देशः' इति क्षीरस्वामी । **यतिः** स्वधर्म्मरक्षार्त्थं यतमानः । उत्तरश्लोके वक्ष्यमाण**विधानेन** ॥ ❊ ॥

अनेकभिक्षाचरणं मुख्यधर्म्मो यतेः स्मृतः ।
त्रिपञ्चसप्तसद्मानि गच्छेन्नातोऽधिकं पुनः ॥ ७ ॥

यतिरिति परमहंसः । अनेकेषु सद्मसु भिक्षाचरणं शुकादिभिराचरितमिति परमहंसानां विशेषतः **मुख्यधर्म्मः** । सोऽयं मुख्यधर्म्म एव सम्प्रति यतिभिः परित्यक्तः । अनेकभिक्षाचरणं धर्म्म इति मत्वा सप्तभ्योऽ**धिकं** सद्म भिक्षार्त्थं **पुनर्न्न गच्छेत्** । सप्तसद्मसु लब्धमन्नं सशिष्यस्य स्वस्यापर्य्याप्तं चेदपि पुनरष्टमं सद्म न गन्तव्यम् । तावतैव सन्तोष्टव्यं तस्मिन् दिने । अधिकगृहाटनेन गृहस्थानां पीडा मा भूदिति ॥

प्रणवप्रतिपाद्यः प्रीयतामिति त्रीणि सद्मानि । पञ्चात्मा प्रीयतामिति पञ्च सद्मानि । सप्तविद्यावेद्यः प्रीयतामिति सप्त सद्मानि । विषमसङ्ख्याटनं भगवत्प्रीतिकरमिति तथोक्तिः । यदि द्वितीये चतुर्त्थे षष्ठे वा सद्मनि पर्य्याप्तभिक्षालब्धिस्तदा तत एव निवृत्तिः । न पुनर्विषमसङ्ख्या न सम्पन्नेति पुनर्ग्गृहान्तरे भिक्षाटनम् । तत्राप्यनुसन्धानं भवति– आत्मान्तरात्मानौ प्रीयेतामिति द्वयोः सद्मनोः । चतुर्म्मूर्त्तिः प्रीयतामिति चतुर्षु सद्मसु । षडक्षरप्रतिपाद्यः प्रीयतामिति षट्सु । अन्ते चेदमनुसन्धानं भवति– अनेन भिक्षाटनेन भगवान् प्रीयतामिति ॥ ❊ ॥

भिक्षाग्रहणकाले तु गृह्णीयाद् दातृतो जलम् ।
भिक्षान्ने तज्जलं प्रोक्ष्य पुनर्ग्राह्यं विदा जलम् ॥ ८ ॥

भिक्षान्नस्य **ग्रहणकाले** । 'भिक्षा तु भिक्षितान्नादौ' इति यादवप्रकाशाचार्य्यः । भिक्षादात्रा दत्तं **जलं** प्रथमं स्वहस्तेन **गृह्णीयात्** । **भिक्षान्ने तज्जलं प्रोक्ष्य** भिक्षान्नं शिक्ये निधाय हस्तक्षालनार्थं **पुनर्ज्जलं** सम्प्रदाय**विदा** यतिना **ग्राह्यम्** । अत्रान्नमिति सर्वमदनीयमुच्यते । 'त्रेधा वा इदमन्नं विहितम् । अशनं पानं खादः' इति श्रुतेः । तेन सव्यञ्जनमन्नं पायसं खाद्यादिकं च सर्वमेकीकृत्य शिक्ये निक्षिपेदिति भाति । रीत्यन्तराभावात् । अद्यतनाः सम्प्रदायज्ञाः कुप्येयुः । ते कथं व्याख्येयासुरिति निरीक्षामहे । प्रायः तदात्वे 'ಮುಸರೆ' इति कल्पना नाऽसीत् । अत एव तद्वाचकं पदं गैर्वाण्यां नास्ति । यदनक्ति तत् क्षाळनीयमितीयानेव सम्प्रदायः । वैद्यशास्त्रानुगुण-श्चायम् । अनेकभिक्षाचरणं विष्णुतीर्थीये न विवृतम् । प्रायः तदात्व एवानेकभिक्षाचरणं लुप्तप्रायमासीदिति भाति । सर्वस्य संहत्य शिक्ये निक्षिप्तस्य संहत्यैव च भोजनम् । नतु पृथक्कृत्य । देहरक्षार्थं हि भोजनम् । नत्वास्वादनार्थम् । जितजिह्वानामीदृशान्यशनानि भवन्ति । प्रत्यक्षतो दृष्टमेतदस्माभिः ॥ ❊ ॥

निवेदयेत् तदन्नं तु वारिजस्योदकेन तु ।
प्रोक्ष्य देवाय महते मूलमन्त्रेण वाग्यतः ।
तदन्नं भक्षयेत् स्वस्थो ह्यजवद्धरिमानसः ॥ ९ ॥

ततः स्वकुटीं प्रत्यागतः तदन्नं भोजनपात्रे निधायेति तुनाऽऽह । ततः शङ्खोदकेन प्रोक्षयेत् । तुना शङ्खे लक्ष्मीसन्निधानेन तज्जलस्य विशेषपावित्र्याधायकत्वमाह । एवं लक्ष्मीहस्तेन शोधितं **तदन्नं** ॐ नमो नारायणाय इदमर्प्पितमस्तु इति **मूलमन्त्रेण महते देवाय** नारायणाय **निवेदयेत्** । एवं प्राणाय स्वाहा इत्यादिमन्त्रैः पञ्चप्राणान्तर्य्यामिणे चतुर्विधान्नपाचकाय **निवेदयेत्** । यतवाक् मौनी प्रतिकवलं गोविन्दनाम

स्मरन् **भक्षयेत्** । तदिदं **हरिमानस** इत्यनेनाऽह । **अजवत्** सपदि भक्षयेदिति । **स्वस्थः** निश्चिन्तः । स्वभावे स्थितः । अगद इत्येतत् । षट्पदाऽनुष्टुप् । जगती छन्दः । उत्तरयोः पद्ययोरपि ॥ ❊ ॥

त्रिवारमुदकस्नानं यतेः शास्त्रेषु चोदितम् ।
अशक्तस्य यतेः शास्त्रे द्विवारं स्नानचोदना ।
अत्यन्ताशक्तविषये त्वेकं स्नानं स्मृतं बुधैः ॥ १० ॥

उदकमिति नदीजलम् । स्नानमित्यवगाहनम् । नहि स्नानं व्यसनितया क्रियते । किन्तु जपपूजाद्यर्थम् । तेन त्रिकालं सन्ध्यावन्दनं पूजा चोक्तप्राये । **शास्त्रेषु चोदितं** विहितम् । **शास्त्रेषूदितं च** तथा सद्भिरनुष्ठितं च । सर्वत्रापि स्नानमित्यवगाहनम् । कदा शक्तता स्यादित्यस्यान्तं निर्णयमतिक्रम्य गतम् । निर्णेतुमशक्यम् । तावदुद्धणमित्यर्थः । **अत्यन्ताशक्तविषये** क्वचिदुष्णोदकस्नानमपि ॥ ❊ ॥

वेदान्तशास्त्राभ्यसनं मुख्यधर्म्मो यतेः स्मृतः ।
देवो नारायणो नित्यं सृष्टिस्थित्यन्तकारकः ।
भक्तानां मुक्तिदो नित्यमन्यथाज्ञानिनां तमः ॥ ११ ॥

अभ्यसनं स्वाध्यायप्रवचनाभ्याम् । श्रवणेन मननेन निदिध्यासनेन च । अनेकभिक्षाचरणं देहधारणार्थं मुख्यधर्मः । **वेदान्तशास्त्राभ्यसनं** स्वरूपोद्धारणार्थम् । वेदान्तेन ब्रह्मसूत्रेण सह तदनुगुणतया शास्त्राणामभ्यसनम् । 'तदर्थान् ब्रह्मसूत्रैश्च सम्यङ् निर्णीय' इति ह्युक्तं प्रणवकल्पे । **नित्यम**नाद्यन्तकालम् । सृष्ट्यादीनां कर्त्ता च कारयिता च । संसारात् **मुक्तिदः** । अत एव बन्धप्रदः । तद्धेतुभूतज्ञानप्रदश्चेत्यर्थात् सिद्धम् । अभक्तानां संसारप्रदस्तमःप्रदश्चेति च । शास्त्रसारस्त्रिभिः

पादैरुक्तः । ये तथा न जानन्ति तादृशा अपि बहवो भवन्ति न्यासिनः । तेषां का गतिः? आह– **अन्यथाज्ञानिनां तमः नित्यं** नियतमिति । 'नित्यं सनातनं प्रोक्तं नित्यं नियतमेव च' इति ह्यभिदधति । अथच द्विविधमन्यथाज्ञानं भवति । नित्यमनित्यं च । तामसानां स्वरूपगतं नित्यम् । अनित्यमपि द्विविधम्– नियतमनियतं च । नियतं नित्य-संसारिणाम् । अनियतं क्वाचित्कं मुक्तियोग्यानामपि । यथा रुद्रस्य रामेण सह युद्धम् । यथा वा इन्द्रस्य कृष्णेन सह युद्धम् । सप्तदिनानि धारासम्पातो वा वृन्दावने । यथा गर्ग्गाचार्य्येण कृष्णाभावाय तपः । यथा वाऽजामिळस्य धर्म्मच्युतिः । तदेतत् सर्वमसुरावेशेन विस्मृतरथाङ्गधरावतारत्वेन भवति । तेन परतोऽन्यथाज्ञानिनस्ते । न स्वतः । अतस्तेषां न दोषः । अथ येषा-मन्यथाज्ञानं अनित्यम्, अथापि नियतम् । एकस्यापगमेऽपरं बाधते । न कदाऽप्यन्यथाज्ञानं सर्वात्मना निवर्त्तते । सन्देहप्रचुरास्ते । तेषां तमः अनित्यं नरकम् । नित्यं तमोऽज्ञानं च । ये तामसास्तेषां नित्यं तम इत्यनेनाऽह ॥ ✻ ॥

पूर्ण्णप्रज्ञेन मुनिना व्यासवाक्यसमुद्धृतिः ।
न्यासधर्म्मस्य विषये शुभा सङ्क्षेपतः कृता ॥ १२ ॥

॥ इति श्रीमदानन्दतीर्थभगवत्पादविरचिता
न्यासपद्धतिः समाप्ता ॥

—०—

पूर्ण्णे भगवति प्रज्ञा यस्य । पूर्ण्णा सर्वविषया च प्रज्ञा यस्य । ओङ्कारो विदितो येन स मुनिः । समुद्धृतिः क्वचिच्छब्दतः । क्वचिदर्थतः । शुभा अर्त्थावगमेन आचरणेन च इष्टार्त्थप्रदा ॥ ✻ ॥

चतुर्विधा हि न्यासिनः– कुटीचका बहूदका हंसाः परमहंसा इति । तत्र विशेषतः परमहंसानामेव न्यासधर्मोऽत्र निरूपितः । तत्रापि बहु वक्तव्यमस्ति । तथाऽपि विस्तरभिया किञ्चिदेवात्रोक्तमिति शम् ॥ ❊ ॥

गोविन्दपण्डिताचार्य्यो न्यासपद्धतिसङ्गताम् ।
अपूर्वां निर्म्ममे टीकां विनेयजनवाञ्छया ॥ ❊ ॥

॥ इति गोविन्दपण्डिताचार्य्यस्य कृतिषु
न्यासपद्धतिटीका पद्धतिचन्द्रिका समाप्ता ॥

—०—

परिशिष्टम्

१. तारतम्यमीमांसा

२. ध्यानमाला

३. श्लोकार्द्धानुक्रमणिका

तारतम्यमीमांसा : १

नत्वा नारायणं देवं मध्वं मूलगुरुं तथा ।
प्रणीयते तारतम्यमीमांसा हरितुष्टये ।।

विष्णोः सर्वोत्तमत्वं वायोश्च जीवोत्तमत्वं न सम्यगवगम्यते विना तारतम्य-मीमांसाम्। विष्णुभक्तिश्च सर्वाधिका न देवतासु परिवारभूतासु तारतम्यपरिज्ञप्तिं विना शक्यमनुसन्धातुम् । तत इयं तारतम्यमीमांसा प्रस्तूयते–

१. परमपुरुषो नारायणः । गुणतो देशतः कालतः शक्तितश्चानन्तः ।

[मत्स्यकूर्म्मक्रोडसिंहवटुभार्ग्गवराघवाः ।
कृष्णबुद्धौ कल्किदत्तहयशीर्षैतरेयकाः ।।

पाराशर्य्यश्च कपिलो वैकुण्ठो वृषभस्तथा ।
यज्ञो धन्वन्तरिश्चैव स्त्रीरूपस्तापसो मनुः ।।

नारायणो हरिः कृष्ण उपेन्द्राः सर्व एव च ।
एवमाद्या हरेः साक्षात् प्रादुर्भावाः प्रकीर्त्तिताः ।।]

२. परा प्रकृतिर्लक्ष्मीः । नारायणादनन्तांशावरा ।

[श्रीर्भूर्दुर्ग्गाऽम्भ्रिणी ह्रीश्च महालक्ष्मीश्च दक्षिणा ।
सीता जयन्ती सत्या च रुग्मिणीत्यादिभेदिता ।।]

३. हिरण्यगर्भः । मुख्यप्राणश्च । लक्ष्म्याः कोटिगुणावरौ ।

[प्राणः सूत्रं महान् ब्रह्मा चित्तं वायुर्बलं धृतिः ।
स्थितिर्य्योगश्च वैराग्यं ज्ञानं प्रज्ञा स्मृतिः सुखम् ।।

मेधा मुक्तिर्विष्णुभक्तिरादिगोपो महाप्रभुः ।
ऋजुः सुमानो विज्ञाता महाद्धयाता महागुरुः ॥

हनूमान् भीम आनन्द इत्यादिबहुरूपिणः ।
हिरण्यगर्भा येऽतीता ये भाव्या यश्च वर्त्तते ॥]

४. हिरण्यगर्भपत्नी सरस्वती । मुख्यप्राणपत्नी भारती च । ब्रह्मवायुभ्यां शतगुणावरे ।

[सरस्वती च गायत्री श्रद्धाऽऽद्या प्रीतिरेव च ।
सर्ववेदात्मिका बुद्धिरनुभूतिः सुखात्मिका ॥

गुरुभक्तिर्हरौ प्रीतिः सर्वमन्त्रात्मिका भुजिः ।
शिवकन्येन्द्रसेना च द्रौपदी काशिजा तथा ।
चन्द्रेत्यादिस्वरूपा यास्तेभ्यः शतगुणावराः ॥]

५. गरुडः । शेषः । रुद्रश्च [एकादशरुद्रेषु यः प्रधानः] । सरस्वतीभारतीभ्यां शतगुणावराः ।

[शेषः सदाशिवश्चोर्ध्वस्तपोऽहङ्कार एव च ।
नरोऽवटो लक्ष्मणश्च रौहिणेयः शुकस्तथा ॥

सद्योजातो वामदेवश्चाघोरस्तत्पुमानपि ।
दुर्वासा द्रौणिरौर्वश्च जैगीषव्यादिरूपकः ॥]

६. विष्णोः कृष्णावतारे षण्महिष्यो नीला, भद्रा, मित्रविन्दा, काळिन्दी, लक्षणा, जाम्बवती च । [आसु जाम्बवती प्रधाना । लक्ष्म्या विशेषावेशदशायां शेषतुल्या ।] गरुडशेषरुद्रेभ्यः पञ्चगुणावराः ।

७. गरुडपत्नी सुपर्णी । शेषपत्नी वारुणी । रुद्रपत्नी पार्वती च । एता गरुडशेषरुद्रेभ्यो दशगुणावराः ।

८. पुरन्दरः । कामश्च । सुपर्णीवारुणीपार्वतीभ्यो दशगुणावरौ ।

[वाली गाधिर्विकुक्षिश्च पार्त्थ इन्द्रः पुरन्दरः ।
सुदर्शनश्च भरतः प्रद्युम्नः स्कन्द एव च ।
सनत्कुमारः कामश्चेत्येक एव व्यवस्थितः ॥]

९. शरीरमानी अहम्प्राणः [४९मरुत्सु प्रधानः]। पुरन्दरकामाभ्यां दशगुणावरः ।

१०. पुरन्दरपत्नी शची । कामपत्नी रतिः । कामपुत्रोऽनिरुद्धः । बृहस्पतिः । स्वायम्भुवमनुः । दक्षप्रजापतिश्च । अहम्प्राणाद् दशगुणावराः ।

११. स्पर्शमानी प्रवहः [४९ मरुत्सु द्वितीयः] । अनिरुद्धादिभिः पञ्चगुणावरः ।

१२. चन्द्रः । सूर्यः । सूर्यपुत्रो यमः । स्वायम्भुवमनुपत्नी शतरूपा च । [द्वादशस्वादित्येषु सूर्यस्तृतीयः । तत्र प्रथमो विष्णुर्वामनोऽदित्यां जातः । इन्द्रानुजतया जात इति तमुपेन्द्रमाचक्षते । द्वितीयोऽष्टमकक्ष्यागतः पुरन्दराख्य इन्द्रोऽदित्यां पूर्वजातः ।] एते प्रवहाद् द्विगुणावराः । अनिरुद्धादिभ्यो दशगुणावराः ।

१३. वरुणः [द्वादशस्वादित्येषु चतुर्थः] ।

१४. नारदः ।

१५. अग्निः [अष्टवसुषु प्रधानः] । वरुणपुत्रो भृगुमुनिः । दक्षप्रजापतिपत्नी स्वायम्भुवमनुपुत्री प्रसूतिश्च । एते चन्द्रादिभ्यो दशगुणावराः ।

१६. वैवस्वतमनुः । विश्वामित्रः । महर्षयः सप्त पूर्वे– मरीचिः, अत्रिः, अङ्गिराः, पुलस्त्यः, पुलहः, क्रतुः, वसिष्ठश्चेति ।

१७. मित्रः [द्वादशस्वादित्येषु पञ्चमः] । निर्ऋतिः । बृहस्पतिपत्नी तारा । प्रवहवायुपत्नी प्रावही च ।

१८. विघ्नाधिपतिर्गणपतिर्भूताकाशमानी । धनपतिः कुबेरः । वायुजो विष्वक्सेनः । सूर्यजावश्विनौ नासत्यदस्रौ नाम । प्रधानवसुमग्निमृते सप्तान्ये वसवः–द्रोणः, प्राणः, ध्रुवः, अर्कः, दोषः, वस्तुः, विभावसुश्चेति । [वसूनामपि नामान्तराणि पठ्यन्ते । वस्तुरेव द्युवसुः, यो भीष्मो बभूव ।] उक्तान् पञ्च वक्ष्यमाणं चैकं विहाय षडादित्याः– अर्यमा, पूषा, त्वष्टा, सविता, भगः, धाता चेति । [आदित्यानामपि बहुधा नामानि पठ्यन्तेऽन्यान्यग्रन्थेषु । बहुनामानो हि देवाः ।] दश विश्वेदेवाः– क्रतुः, दक्षः, सवः, सत्यः, कामः, कालः, धुरिः, लोचनः, पुरूरवः, आर्द्रवश्चेति । एकादशसु रुद्रेषु प्रधानं विहायान्ये दश– रैवतः, ओजः, भवः, भीमः, वामः, उग्रः, वृषाकपिः, अजैकपात्, अहिर्बुध्निः, विरूपाक्षश्चेति । [रुद्राणामपि नामान्तराण्यन्यत्र पठ्यन्ते ।] एकोनपञ्चाशन्मरुत्सु अहम्प्राणं प्रवहं च विहायावशिष्टाः ४७ मरुतः– प्राणः,अपानः,व्यानः,उदानः, समानः, नागः,कूर्मः, कृकलः, देवदत्तः, धनञ्जयः, आवहः, उद्वहः, परावहः, विवहः, संवहः, शम्भुः, शङ्खुः, कलः, श्वासः, अनलः, अनिलः, प्रतिभः, कुमुदः, कान्तः, शुचिः, श्वेतः, अजितः, गुरुः, सञ्ज्ञः, प्रवर्तकः, कालः, दक्षः, सोम्यः, कपिः, जडः, मण्डूकः, सन्ततः, सिद्धः, रक्तः, कृष्णः, पिकः, शुकः, यतिः, भीमः, हनुः, पिङ्गः, कम्पनश्चेति । [मरुतामपि बहुविधानि नामानि पठ्यन्ते । नैकत्राप्येकरूपता । तत्रायमेकः प्रकारः प्रत्नैरुद्धृतः] । पितृपतिष्वेकः कव्यवाहनामाऽग्निः । [त्रिषु प्रधानपितृपतिषु द्वौ यमसोमौ नाम द्वादशकक्ष्यायां गतौ] । ऋभवस्त्रयः– ऋभुः, विभ्वा, वाजश्चेति । द्यावापृथिवीमानिन्यौ च देव्यौ ।

१९. प्रधानवायुपुत्रो भूतवायुमानी मरीचिः[१] । प्रधानाग्निपुत्रो भूताग्निमानी पावकः । पादमानिनाविन्द्रपुत्रौ यज्ञनामा जयन्तः, शम्भुश्च । दैत्यगुरुः शुक्रः । तत्सोदरश्च्यवनः । बृहस्पतिसोदर उचथ्यः । उक्तं सनत्कुमारं विहायान्ये त्रयो ब्रह्मणो मानसपुत्रा ऋषयः– सनकः, सनन्दनः, सनातनश्च । सप्त चान्य ऊर्ध्वरेतसः । एतान् दश, पूर्वोक्तान् सनत्कुमारादींश्च दश विहायान्ये काश्यपाद्या अशीतिर्गृहस्था ऋषयः । भाविमन्वन्तराणामिन्द्राः सप्त– बलिः, अद्भुतः, शम्भुः, विधृतिः, ऋतधामा, दिवस्पतिः, शुचिश्च । [अतीतेषु मन्वन्तरेषु प्रथमे स्वायम्भुवेऽन्तरे यज्ञनामा विष्णुरेवेन्द्रः । द्वितीये स्वारोचिषे रोचननामा वायुः । तृतीये चौत्तमे सत्यजिन्नामा यम इन्द्रः । चतुर्थे तापसे पञ्चमे च रैवते त्रिशिखविभुनामानौ नासत्यदस्रावश्विनाविन्द्रौ । षष्ठे चाक्षुषे मन्द्रद्युम्नः, स एव च सप्तमे वैवस्वतेऽन्तरे पुरन्दरनामेन्द्रः । तमेतमष्टमकक्ष्यागतमिन्द्रमाचक्षते ।] त्रीनुक्तान् विहायावशिष्टा एकादश मनवः– स्वारोचिषः, उत्तमः, रैवतः, चाक्षुषः, सावर्णिः, दक्षसावर्णिः, ब्रह्मसावर्णिः, धर्मसावर्णिः, रुद्रसावर्णिः, देवसावर्णिः, इन्द्रसावर्णिश्चेति । [प्रथमः स्वायम्भुवो मनुर्दशमकक्ष्यायां गतः । चतुर्थस्तापसो मनुः स्वयं विष्णुरेव । सप्तमो वैवस्वतः षोडश्यां कक्ष्यायां गतः । अपरे त्वेकादशात्र ।] दशसु पितृपतिषु पूर्वोक्तान् यमसोमकव्यवाहान् विहायान्ये सप्त । अष्टौ विष्णोर्द्वारपालकाः– जयः, विजयः, चण्डः, प्रचण्डः, नन्दः, सुनन्दः, कुमुदः, कुमुदेक्षणश्चेति । अष्टौ प्रधानगन्धर्वाः । अष्टौ प्रधानाप्सरसः । विश्वकर्मा । चित्रगुप्तः । सूर्यसारथिररुणः । नन्दी । ऐरावतः । सुरभिः । कल्प-

१. आकाशमानी भूतवायुमानी च समानाविति चैतरेयभाष्यादवगम्यते । तेन मरीचिरेकान्नविंश्यां पठितेषु प्रधानः, अष्टादश्यां कक्ष्यायां पठिताद् गणपतेः किञ्चिन्न्यूनः । प्रायस्तत्समान इति ज्ञायते । अथाप्युपासनायामेव समबलत्वं न स्वरूप इति । तेन मरीचिं पूर्वे विद्वांस एकान्नविंश्यां कक्ष्यायां पठन्ति ।

वृक्षादिदेवताः । अहोरात्रदेवते । पूर्णिमामावास्यादेवते । अभिजिद्-विषुवद्देवते । ओषधिवनस्पत्यभिमानिनः । हविःकपालाद्यभिमानिनश्च । कर्मणा देवत्वं गताः शतं राजर्षयश्च– पृथुः, कार्तवीर्यः, शशबिन्दुः, प्रियव्रतः, उत्तानपादः, मान्धाता, गयः, ककुत्स्थः, नहुषः, अम्बरीषः, आर्षभो भरतः, दौःषन्तिर्भरतः, मरुत्तः, हरिश्चन्द्रः, प्रह्लादः, परीक्षिदाद्याश्च । त एतेऽग्नेः शतगुणावराः ।

२०. द्वादशादित्येषु चरमः पर्जन्यः । अनिरुद्धभार्या उषा विराडाख्या । चन्द्रभार्या रोहिणी । सूर्यभार्या सञ्ज्ञा । यमभार्या श्यामळा । वरुणभार्या च गङ्गा । एकान्नविंशकक्ष्यापठितेभ्यो मरीच्यादिभ्यो द्विगुणावराः ।

२१. उक्तवक्ष्यमाणेभ्योऽन्ये अनाख्याताः देवाः । [केचिन्नैतां कक्ष्यां परिगणयन्ति] ।

२२. अग्निभार्या वाङ्नामिनी स्वाहा । एकान्नविंशकक्ष्यापठितेभ्यः पञ्चगुणावरा ।

२३. जलमानी बुधः । स्वाहातो द्विगुणावरः ।

२४. अश्विभार्या नाममानिनी उषाः । स्वाहातो दशगुणावरा ।

२५. कुजः[१] ।

२६. पृथिवीमानी सूर्यतनयः शनिः ।

२७. कर्ममानी वरुणपुत्रः पुष्करः ।

२८. काश्यपभार्याऽदितिः, या देवकी बभूव । द्रोणाख्यवसुभार्या धरा, या यशोदा बभूव ।

२९. कृष्णपत्नीत्वेन जाता अग्निपुत्राः १६,१०० सङ्ख्याकाः । आसु त्वष्टृपुत्री कशेरुः किञ्चिदधिका ।

१. अयमप्येकोनविंश्यां कक्ष्यायां पठनीय इत्येके ।

३०. अनाख्याता आजानजा देवाः । शतं गन्धर्वाः । शतमप्सरसः । [शतं कोटीनामृषयः सन्ति । तत्र पूर्वोक्तमृषीणां शतकं विहायावशिष्टाः] ९९,९९,९९,९०० ऋषयः । एकान्नविंशकक्ष्यापठितेभ्यः कर्मदेवेभ्यः शतगुणावराः ।

३१. पूर्वोक्तानां सप्तानां पितृपतीनां सन्ततिभूताश्चिरपितरः । आजानदेवेभ्यः शतगुणावराः ।

३२. पूर्वोक्तं गन्धर्वाणामप्सरसां च शतमष्टोत्तरं विहायावशिष्टा गन्धर्वा अप्सरसश्च । चिरपितृभ्यः शतगुणावराः ।

३३. मनुष्यगन्धर्वाः । गन्धर्वेभ्यः शतगुणावराः ।

३४. चक्रवर्तिनः । मनुष्यगन्धर्वेभ्यः शतगुणावराः ।

३५. नरोत्तमाश्चतुर्वर्णगताः । चक्रवर्तिभ्यः शतगुणावराः ।

***

एतेषु च विशिष्योपनिषदुक्ता नामादिमारुतान्ता यथा–

१. नाममानिनी उषाः	[२४]	८. बलमानी प्रवहः	[११]
२. वाङ्मानिनी स्वाहा	[२२]	९. अन्नमानी अनिरुद्धः	[१०]
३. मनोमानी पर्जन्यः	[२०]	१०. अम्मानी अहम्प्राणः	[९]
४. सङ्कल्पमानी मित्रः	[१७]	११. तेजोमानी पुरन्दरः	[८]
५. चित्तमानी अग्निः	[१५]	१२. आकाशमानिनी उमा	[७]
६. ध्यानमानी वरुणः	[१३]	१३. स्थिरस्मृतिमानी शिवः	[५]
७. विज्ञानमानी चन्द्रः	[१२]	१४. आशामानिनी भारती	[४]

१५. जीवमानी मुख्यप्राणः [३]

[बलमिति ज्ञानबलं देहबलं च । तदुभयमानी भूतवायुः । अन्नमिति ज्ञानरतिरूपं ज्ञानान्नं बाह्यमन्नं च । तदुभयमानी अनिरुद्धः । आप इति ज्ञानतृप्तिर्बाह्यजलं च । तदुभयमानी अहम्प्राणः । तेज इति मानसं प्रतिभानं

बाह्यं च । तदुभयमानी पुरन्दरः । आकाश इति स्थिरा प्रतिभा भूताकाशश्च । तदुभयमानिन्युमा । ततः स्थिरस्मृतिमानी शिवः । तत आशाया अपरोक्षानन्दस्य मानिन्यौ सरस्वतीभारत्यौ । ततश्च जीवकलामानी मोक्षानन्दमानी च प्राणात्मा हिरण्यगर्भ इति ।]

तथाहि श्रुतिः– **'अथातः सम्भूतिः । परमाद् विद्या विद्यायाः प्राणः प्राणाच्छ्रद्धा श्रद्धायाः शिवः शिवाद् बुद्धिर्बुद्धेरिन्द्र इन्द्रात् तैजसप्राणस्तैजसप्राणादनिरुद्धोऽनिरुद्धात् स्पर्शवातः स्पर्शवातात् सोमः सोमाद् वरुणो वरुणादग्निरग्नेर्मित्रो मित्रात् पर्जन्यः पर्जन्यात् स्वाहा स्वाहाया उषा जायते'** इति ।

उत्तरोत्तरं ब्रह्मान्तं शतगुणाधिक्यक्रमः

१.	**नरोत्तमः**	१
२.	**चक्रवर्तिनः**	१००
३.	**मनुष्यगन्धर्वाः**	१००,००
४.	**देवगन्धर्वाः**	१००,००,००
५.	**चिरपितरः**	१००,००,००,००
६.	**आजानदेवाः**	१००,००,००,००,००
७.	**कर्मदेवाः**	१००,००,००,००,००,००
८.	**अग्निः**	१००,००,००,००,००,००,००
९.	**अनिरुद्धः**	१००,००,००,००,००,००,००,००
१०.	**पुरन्दरः**	१००,००,००,००,००,००,००,००,००
११.	**गरुडशेषरुद्राः**	१००,००,००,००,००,००,००,००,००,००
१२.	**सरस्वतीभारत्यौ**	१००,००,००,००,००,००,००,००,००,००,००
१३.	**ब्रह्म-वायू**	१००,००,००,००,००,००,००,००,००,००,००,००

ततः कोटिगुणा रमा । अनन्तगुणो नारायण इति ।

इमामाचार्य्यगोविन्दश्चक्रे चक्रायुधप्रियाम् ।
तारतम्यस्य मीमांसां विनेयजनवाञ्छया ॥ ❊ ॥

इत्याचार्य्यगोविन्दस्य कृतिषु तारतम्यमीमांसा समाप्ता

—०—

ध्यानमाला : २

ॐ ॥ **अनेक-जन्म-सञ्चित-प्रभूत-पुण्य-निर्म्मितम् ।**
शरीरमीदृशं भवेत् कुतोऽन्यथा रतिर्हरौ ॥ १ ॥

ध्यानगम्यं सम्प्रणम्य ध्यानमालां विवृण्महे ।
जिज्ञासा किल दिध्यासापर्यन्ता शास्त्रविन्मता ॥ ❋ ॥

जन्मभिः, जन्मसु वा सञ्चितम् । ईदृशमिति मानुषम्, वैष्णवं वैप्रं च ॥

अदः प्रपद्य साधवः प्रसाधयन्ति माधवम् ।
सदागमैः सु-युक्तिभिः सु-निष्ठया च भक्तिभिः ॥ २ ॥

अदः मानुषं शरीरम् । वैष्णवकुलसम्भवाः साधवः । सदागमाः सत् निर्दोषं ब्रह्म आगमयन्तीति । सन्तश्च त आगमा अपौरुषेयतया तन्मूलतया च । मनसो भगवति निष्ठया । निष्ठा च यथाकथाच भवतीति विशिष्यते– भक्तिभिरिति । नवविधाभिः । प्रकर्षेण साधयन्ति । प्रसन्नमापादयन्ति च ॥

वयं च दैव-योगतः[1] प्रतीकमीदृशं गताः ।
यतामहे मनो-वचः-प्रवृत्तिभिः सुवृत्तिभिः ॥ ३ ॥

वयमित्यात्मनि बहुवचनम् । प्रतीकं शरीरम् । सुवृत्तिभिः भगवन्निष्ठाभिः मनसो वचसां च प्रवृत्तिभिः प्रवर्तनैः व्यापारैरित्येतत् । यद्वा प्रकृष्टा

१. 'देवयोगतः'

वृत्तिरस्येति प्रवृत्तिः काय उच्यते । सुवर्तनैः मनोवचःकायैस्त्रिकरणैः । यतामहे माधवं प्रसादयितुम् ॥

अनादि-कर्म्म-वासना-निरन्तरानु-बन्धनम् ।
नृसिंह-पावके मनो निमज्ज्य भस्म-सात् कुरु ॥ ४ ॥

हे मनः, नृसिंहाख्ये पावके निमज्ज । निमज्ज्य त्वयि लग्नं वासनाबन्धं भस्मसात् कुरु ॥ ४ ॥

अशेष-कल्मष-क्षयात् ततः प्रभोदयो भवेत् ।
अथापि भक्त-वत्सलो हरिः प्रसादमृच्छति ॥ ५ ॥

प्रज्ञाप्रभायाः उदयः । अथच तेन प्रज्ञाप्रकर्षेण भक्त्या च भक्तप्रियो हरिः यः संसारं हरति, आहरति च मोक्षसुखम्, प्रसीदति ॥

सदागमैः समन्वयात् सदोदिता गुणा हरेः ।
न युक्तयो नचाऽगमा विरोद्धुमीशते परे ॥ ६ ॥

हरावेव सम्यगन्वयात् । ननु शुष्कयुक्तिभिः परागमैश्च अन्यत्राप्यन्वीयेरन्? नेत्याह– न केवलयुक्तय इति । परे अवैदिका आगमाश्च । परात् परे भगवति च विषये ॥ ६ ॥

हरेः प्रबोध-सम्भवो विरक्ति-भक्त्युपास्तिभिः ।
निजापरोक्ष्य-भागिनः सृतेरयं प्रमोचयेत्[१] ॥ ७ ॥

प्रबोधः साक्षात्कारः । उपास्तिः शास्त्रावमर्शः । तत् फलं ध्यानं च । आपरोक्ष्यभागिनश्च पुरुषान् संसाराद् विमोचयेत् ॥

इतीममर्त्थमञ्जसा मनः सदैव भावय ।
त्वमङ्ग वागनाकुलं विचारयस्व शास्त्रतः ॥ ८ ॥

---

१. **'प्रबोधयेत्'** इति कोशेषु दृश्यते । **'प्रमोदयेत्'** इति स्वरसः पाठः ।

हे अङ्ग मनः । अङ्गेत्यावर्जने । परस्परं विप्रतिपन्नाभिर्वाग्भिः अनाकुलं सत् । शास्त्रतः शास्त्रमनतिक्रम्य । वेदमूलरामायणभारतपञ्चरात्र-पुराणाख्यस्वशास्त्रतः विचारय इति वा । तदेतेन विवृता चतुःसूत्री ॥

शतोत्तरा तु नाडिका सुषुम्न-रश्मि-दीपिता ।
उपासतो जनार्दनं कळेबरेऽभि-भासते ॥ ९ ॥

'शतं चैका च हृदयस्य नाड्यः' इति हि श्रुतिः । सुषुम्नाख्येन सूर्यकिरणेन प्रकाशिता । 'तत्प्रकाशितद्वारः शताधिकया' इति च कार्ष्णं सूत्रम् । उपासत इत्युपासकस्य । भ्वादेः 'अस गतिदीप्त्यादानेषु' इत्यस्येदं रूपमिति वैयाकरणाः ॥

दिनेश-रश्मि-सञ्चय-स्फुरत्-सु-नाडिकावृता ।
यथाऽमृतांशु-मण्डली प्रदीप्त-तारकावृता ॥ १० ॥

परितः सर्वा अपि नाड्यस्तारका इव स्फुरन्ति दिनेशरश्मिभिः । मध्ये च ताभिरावृता सुषुम्नाख्या नाडी सुषुम्नाख्येन रश्मिना तारकाभिरावृता चन्द्रमण्डलीव ॥

अशेष-लोक-पावनी[१] वि-निःसृता च मूर्द्धनि ।
तयोर्ध्वमेव यो[२] व्रजन्नुतामृतत्वमेति हि ॥ ११ ॥

अशेषसाधकलोकपावनी । पावयित्री । 'तासां मूर्द्धानमभिनिःसृतैका । तयोर्ध्वमायन्नमृतत्वमेति' इति हि श्रुतिः ॥

अतीव सूक्ष्म-रूपिणी तथाऽपि शक्तितो हरेः ।
महावकाश-संयुता दुरन्त-शक्तिमान् ह्यजः ॥ १२ ॥

महावकाशसंयुतेति । तदुक्तम्– 'यावान् वा अयमाकाशस्तावानेषोऽन्त-र्हृदय आकाशः' इति ॥

---

१. **'अशेषलोकपालना'** इति कोशेषु । **'-पालनी'** इत्यपि स्यात् । २. **'यो व्रजेदुता–'**

वरोऽपि रत्न-मण्डपो विभाति तत्र पेशलम् ।
अनन्त-कान्ति-कान्त-सन्मणीन्द्र-माालिका-स्फुरन्[1] **॥ १३ ॥**

पेशलमिति क्रियाविशेषणम् । पेशलतया चारुतया विभातीति ॥

अमन्द-सौरभ-स्मित-प्रसून-दाम-पाळिभिः ।
अगत्वरोरु-कान्तिभिः क्षरत्-सुधाभिरुल्लसन्[2] **॥ १४ ॥**

पाळिभिः पङ्क्तिभिः । अगत्वरा अचला । गमेः क्वरप् ॥

इहापि रत्न-निर्म्मितं सरो-रुहं मनो-रमम् ।
सुतीव्रमच्छ-सच्छदं विकस्वरं विराजते ॥ १५ ॥

सुतीव्रं गन्धेन । अच्छं सच्छदं च । अच्छैः छदैः सहितमित्येतत् ॥

वि-पाप्म-तां च दभ्र-तां परस्य वेश्म-भूत-ताम् ।
पुरस्य मध्यसंस्थ-तां मनीषिणः श्रुतौ स्फुटम् ॥ १६ ॥

उदा-हरन्ति यान् गुणान्[3] **तदेतदुत्तमोत्तमम् ।**
हृदम्बुजं दिवा-कर-प्रकार-दीधिति-ज्वलत् ॥ १७ ॥

'दहं विपाप्मं परवेश्मभूतं यत् पुण्डरीकं पुरमध्यसंस्थम्' इति हि तद्गुणानुदाहरन्ति श्रुतौ । दिवाकरप्रकारं दीधितिभिः ज्वलत् ॥

अमुष्य कर्ण्णिका-पुटे सु-दीप्त-रत्न-विष्टरम् ।
चकासतः परः पुमानधि-ष्ठितोऽति-शोभनम् ॥ १८ ॥

चकासतः अमुष्य हृदम्बुजस्य मध्यसम्पुटे ॥

---

१. **'स्फुरत्'** इति हस्तलिखितः पाठः । लिपिकृत्प्रमादः स्यात् ।

२. **'सुधाभिरुल्लसत्'** इति ।

३. **'यान् गुणान्'** इति हस्तलिखितः पाठः । **'यद् गुणान्'** इत्यपि स्यात् ।

असङ्ख्य-बाल-भास्करारुण-प्रभूत-तेजसम् ।
तमेतमक्षरं मनो वि-चिन्तयस्व सन्ततम् ॥ १९ ॥

बालः उद्यन् भास्करः । तद्वररुणवर्णं प्रभूतं च तेजो यस्य । न क्षरति रमते चाक्षेष्विति अक्षरः । अधिकं क्षरति च । क्षर सन्ततदाने च ॥

जपा-प्रसून-पाटल-स्फुरत्-तलाङ्घ्रि-पङ्कजम् ।
तटिल्लता-लसन्नखं सु-हारि-जङ्घमुत्तमम् ॥ २० ॥

सुमनोहारिजङ्घम् । उत्तममक्षरं चिन्तयस्व ॥

समग्र-चन्द्र-मण्डलानु-कारि-जानु-मण्डलम् ।
महेन्द्र-हस्ति-हस्त-सप्रभोरु-चारु-विभ्रमम्[१] ॥ २१ ॥

वराचित-स्मितासन-प्रसून-कान्ति-वाससम् ।
विचित्र-रत्न-मेखला-कलाप-वर्य्य-भूषितम् ॥ २२ ॥

वराणि आचितानि सञ्चितानि स्मितानि विकसितानि असनकुसुमानि । मेखलाकलापः काञ्चीकलापः । हारमालेति यथा ॥

वलि-स्फुरत्-तनूदर-प्रभात-नाभि-मण्डलम् ।
पयोब्धि-कन्यका-धरा-करावगूढ-मद्भ्यमम् ॥ २३ ॥

कराळ-हार-मालया सु-दिव्य-सून-मालया ।
निरन्तरोर्जित-श्रिया चकासदच्छ-वक्षसम् ॥ २४ ॥

कराळया प्रखरप्रभया । हारमालया मुक्तामालया ॥

समस्त-लोकसुन्दरीमनन्त-राज-रोचिषम् ।
अमन्द-भासि बिभ्रतं श्रियं विशाल-वक्षसि ॥ २५ ॥

---

१. 'प्रभोरुहारिविभ्रमम्'

समस्तलोकेष्वप्यनन्यसुन्दरीम् । अनन्तचन्द्रकान्तिम् । अमन्दं भासमाने वक्षसि बिभ्रतम् ॥

शिरो-धरोल्लसन्महा-मनः-समूह-कौस्तुभम् ।
समुन्नतांस-मण्डल-द्वयाभि-राममुज्ज्वलम् ॥ २६ ॥

शिरोधरायां कण्ठे उल्लसन्, गुणतः प्रकाशतश्च महान् । मनःसमष्टिरूपश्च कौस्तुभमणिर्यस्य । मन इति मननसाधनं स्मरणकारणं चित्तमुच्यते । 'चैत्त्यस्य तत्वममलं मणिमस्य कण्ठे' इति हि स्मरन्ति ॥

सु-दर्शनीयमम्बुजं सुदर्शनं वरोदरम् ।
महा-दरं दर-च्छिदं गदामराति-भङ्ग-दाम् ॥ २७ ॥

बिभर्त्ति पाणि-पल्लवैरनन्त-विभ्रमाकरैः ।
चतुर्भिरुत्तमोत्तमं तमान्तर स्मर स्फुटम् ॥ २८ ॥

वरोदरं उत्कृष्टमध्यम् । वरं उद्गतारं च वा । दरच्छिदं भयच्छिदं महा-शङ्खम् ॥

सु-पद्मराग-भङ्ग-भा-स्फुरन्नखालि-शोभितम् ।
सुवर्ण्ण-रत्न-मुद्रिका-प्रभात-कोमलाङ्गुलिम् ॥ २९ ॥

पद्मरागस्य भङ्गो विच्छित्तिविशेषः । भङ्गवती वक्रा वा भाः । तद्वत् स्फुरन्ती नखपङ्क्तिः ॥

अनर्घ-दीर्घ-सद्[1]-घृणि-प्रकाशिताखिलाशकैः ।
वराङ्गदैरलङ्कृतं महा-धनैः स-कङ्कणैः ॥ ३० ॥

अनर्घाः उत्तमाः । दीर्घं दूरं सीदन्ति प्रसरन्तीति दीर्घसदः घृणयः किरणाः । दीर्घाश्च सन्तश्च निर्दुष्टाश्च वा । आशाः दिशः ॥

१. '**सन्घृणि–**' इति कोशेषु । लिपिकारप्रमादः स्यात् ।

उदार-हार-गौर-दत्-ततिं सु-मन्द-हासिनम् ।
विशुद्ध-विद्रुमाधर-द्विज-च्छदाति-पेशलम् ॥ ३१ ॥

उदारो महान् हारो मुक्तासरः । तद्वद् धवळा दन्तपङ्क्तिरस्य । विद्रुमवदरुणेन अधवद्विजच्छदेन अधरोष्ठेन अतिसुन्दरम् ॥

सु-हारि-हेम-कुण्डल-प्रभात-गण्ड-मण्डलम् ।
नवीन-वारिजोदर-च्छदायताम्बक-द्वयम् ॥ ३२ ॥

दयार्द्रया दृशाऽनिशं भवाब्धि-साध्वसोत्-कृता ।
सु-दिव्ययाऽमृत-स्रुता निजेषु दोग्धि योऽमृतम् ॥ ३३ ॥

साध्वसमुत्कृन्ततीति तादृश्या । अमृतस्रुताऽपि दृशा निजेष्वेव, ये स्वयममृतत्वयोग्याः, अमृतं दोग्धि मोक्षम् ॥

अराळ-नील-कुन्तळावली-विराजि-सन्मुखम् ।
अनन्त-रत्न-चित्रितोन्मिषत्-किरीट-मण्डितम् ॥ ३४ ॥

अराळाः कुटिलाः कुन्तळाः । चित्रितेन चित्रवर्णेन उन्मिषता स्फुटद्भासा किरीटेन ॥

विधूत-दोषमुत्तमं चिति-प्रमोद-रूपिणम् ।
अधीशितारमञ्जसा भजस्व चित्त सच्चिते ॥ ३५ ॥

विधूता दोषा यस्य । येन भक्ता अपि विधूतदोषाः । सत्पदार्थोऽयम् । चिदानन्दरूपिणम् । आत्मपदार्थमाह– अधीशितारं स्वामिनमिति । सतस्तस्य चिते परिज्ञानाय । सत्यै च चिते ॥

श्रियोदयद्-दिवाकर-व्रज-श्रिया निषेवितम् ।
ह्रिया कटाक्ष-वीक्षण-स्फुरन्मुखारविन्दया ॥ ३६ ॥

ह्रिया उपलक्षितेन कटाक्षवीक्षणेन । स्वस्यैव रूपान्तरेण वा । 'ह्रीश्च ते लक्ष्मीश्च पत्न्यौ' इति श्रवणात् ॥

प्रकाशमान-कुण्डल-द्वय-प्रभात-गण्डया ।
परार्ध्य-रत्न-मालिका-गणोज्ज्वलत्-किरीटया[1] ॥ ३७ ॥

अराळ-नील-कुन्तळ-व्रजोडु-राज-वक्त्रया ।
स्मिताम्बुज-च्छदायत-प्रभूत-कान्ति-नेतत्रया ॥ ३८ ॥

उडुराजः चन्द्रः ॥

विपाक-ताम्र-तुण्डिका-सुपाटलाधर-श्रिया ।
वलक्ष[2]-कुन्द-कुड्मल-प्रकाश-कान्त[3]-दन्तया ॥ ३९ ॥

तुण्डिका बिम्बफलम् । 'ತೊಂಡೆ' इति भाषायाम् । वलक्षः धवळः ॥

गळ-स्फुरन्निरन्तर-प्रभालि-रत्न-वेषया ।
प्रवेक-वेष-भूषित-प्रवेष्ट-शोभि-पद्मया ॥ ४० ॥

रत्नवेषो रत्नमालालङ्कारः । प्रवेकैः प्रकृष्टैः वेषैरलङ्कारैः केयूरकटकादिभिः भूषितः प्रवेष्टो बाहुः ॥

सहार-मालिका-तती-विराजि-चारु-वक्षसा ।
सु-वृत्त-तुङ्ग-पीवर-ज्वलत्-पयोधर-स्फुरा ॥ ४१ ॥

तनूदर-स्फुटीभवद्-वलि-त्रयाभिरामया ।
सुवर्ण्ण-मेखलोपरि-स्फुरत्-पिशङ्ग-वाससा ॥ ४२ ॥

मनोज्ञ-हारि-नूपुर-प्रभासिताङ्घ्रि-पद्मया ।
उदार-रत्न-दर्प्पण-प्रभा-नखावलि-श्रिया ॥ ४३ ॥

अनन्त-नूत्न-भास्कर-प्रभा-प्रभासमानया ।
गुणाळि-भाजनीभवत्-प्रमोद-चित्-स्वरूपया ॥ ४४ ॥

नूत्नाः उद्यन्तः ॥

---

१. कोशेषूपलब्धपाठः **'परार्घ्यरत्नमालया चणोज्ज्वरत्किरीचया'** इति अर्थस्त्वस्फुटः ।

२. **'–चलर्क्षकुन्द–'** ३. **'प्रकाशिकान्त–'**

तथैव चारु-लीलया हरिन्मणि-श्रिया भुवा ।
विचित्र-वाससा स्मित-श्रियाऽनुरञ्जिताशया ॥ ४५ ॥

यथा श्रिया तथैव भुवा च निषेवितम् । तथैव सर्वाङ्गलक्षणलक्षितया च । हरिन्मणिश्रिया सस्यश्यामलया ॥

अथापि सर्व-साक्षिणि क्षणे-क्षणेऽम्बुजेक्षणे ।
प्रवृत्ति-जातमञ्जसा हरौ मनः समर्प्पय ॥ ४६ ॥

पुरोपचेयमात्मनः पुरा प्रसाधनं स्मर ।
ततोऽपचेय-सत्-क्रिया अमुष्य बुद्धि-वर्द्धनीः[१] ॥ ४७ ॥

आत्मन उपचेयं सम्पादनीयं साधनीयं पुरा स्मर । यच्च प्रसाधनं साधितं तच्च पुरा स्मर । ततः अपचेयाः भगवदपचित्यै पूजायै करणीयाः सत्-क्रियाः स्मर । अमुष्य हरेः ज्ञानवर्धनीः । 'कर्मणा ज्ञानमातनोति' इति हि श्रूयते ॥

उपद्रवे विपत्तिभिः स्मराघ-नाशनं परात्[२] ।
अशेष-सम्पदां परं पदं मुदाऽभिराधय ॥ ४८ ॥

सुषुप्ति-सन्ध्य-जागर-क्रिया-फलैर्हरिं पुरः[३] ।
परं सदा समुद्विशन्मनोऽर्च्चयाभिनन्दय[४] ॥ ४९ ॥

॥ इति ध्यानमाला समाप्ता ॥

सन्ध्यमिति स्वप्नः । पुरः देहस्य क्रियाभिः फलैश्च हरिं समुद्विशत्, हरिमेवार्चय हे मनः । तदुक्तं योगदीपिकायाम्– 'स्वात्मनस्तस्य पूजाः स्युर्मनोवाक्कायवृत्तयः । ममैता इति कर्तारमुद्देश्यं च हरिं स्मरेत्' इति ॥

१. **'शुद्धिवर्धिनीः'** २. **'स्मराघनाशनं हरिम्'**

३. **'क्रियाफलैर्हरिं परात् । परं सदा'** इति पाठः स्यात् ।

४. **'मनोऽर्चयाभिनन्दयन्'** इति हस्तलिखितः पाठः । **'–भिनन्दय'** इति सङ्गतः पाठः । **'–भिनन्दयत्'** इत्यपि पाठः स्यात् ।

कस्येयं कृतिरिति कोशे न दृश्यते । परं तु कृष्णमालया सह पठ्यते । कृष्णमाला तु नारायणपण्डिताचार्यकृतेति चरमश्लोके स्फुटम् । शैली च संवदते। तस्मादियं नारायणपण्डिताचार्यकृतिरिति निर्णीयेत। कृतिनाम च कोशेषु न पठ्यते । कृष्णमालासाहचर्यात् ध्यानमालेति मयैव नामधेयमुट्टङ्कितम् । नामान्तरं च स्याद् ध्यानपद्धतिरित्यादि ॥

इमामाचार्य्यगोविन्दः प्रमृष्टां शब्दतोऽर्थतः।
वितेने विमलां टीकां विनेयजनवाञ्छया॥

इत्याचार्य्यगोविन्दस्य कृतिषु ध्यानमालाटीका समाप्ता ॥

—०—

श्लोकार्द्धानुक्रमणिका : ३

ओन्तत्सत्प्रणवकल्पः

अ

अकारादेस्तथा शान्ता- ४
अतिरक्ततळं भास्व- ७
अधीहि भगवो ब्रह्मे- २
अन्तर्य्यामीति गायत्री ३
अन्यांश्च वैष्णवान् मन्त्रान् २३
अभिन्नानेव सततं १२
अष्टपत्रे तु हृत्पद्ममद्ध्ये ५

आ

आत्मानं प्रतिबिम्बत्वे २२

इ

इतिहासपुराणे च २४

उ

उच्चारयंस्त्रिशस्तारं २
उद्यदादित्यसङ्काशं ६

ऋ

ऋषिच्छन्दोदैवतानि २

ए

एवं कृते तु शपथे १६
एवमुक्त्वा गुरुर्द्ध्यानं १३
एवमुक्त्वा तु तद्ध्यानं ५

क

कर्त्तव्यैव त्वया वत्स २०
कृष्णो रामो नृसिंहश्च ४

च

चिन्तयेयं मृतौ वाऽपि १४

त

तदर्त्थान् ब्रह्मसूत्रैश्च २५
तन्निन्दकैश्च तद्भक्त- १५
त्रिसहस्रात् परो यस्तु २१

द

द्ध्यायस्व सततं पुत्र २२

न

न चान्यदेवसामान्यं १४
न मुक्तौ विष्णुनैक्यं वा १९
न विष्णुं वैष्णवांश्चैव १३
नित्यशश्च हरेः पूजा २०
निधायोत्तीर्य्य संसारात् १६
निम्ननाभिं च त्रिवलि- ८
निःशेषदुःखशमनं ११

प

परज्योतिः परम्ब्रह्म ४
पीठं तन्मद्ध्यपद्मस्थं ५
पूर्णचन्द्रायुतोद्रिक्त- ११
पृथुदीर्घचतुर्बाहुं १०

भ

भक्तिमांश्चाथ देवेषु १८

म

मद्ध्यमः प्रणवस्योक्तो- २१
महाकटितटाबद्ध- ८
मानसेनाथ पुष्पैर्वा २२

य

युक्तमुन्निद्रपद्माक्षं १०

व

वनमालाधरं हार- ९
वराभयोद्यतकरान् १२
विश्वश्च तैजसः प्राज्ञ- ३
विश्वादींश्चैव कृष्णादीन् १३
विष्णोः सर्वोत्तमत्वं तु २५
विस्तारिवक्षसं भ्राज- ९
वृत्तजङ्घं वृत्तजानुं ७
वेदान् मन्त्रानुपनिष- २४

श

शृणुष्व वैष्णवं शास्त्रं २३

स

समत्ववादिभिर्वाऽहं १५
समिच्चर्वाज्यकान् हुत्वा १
सम्प्राप्य विष्णुसामीप्यं १७
सर्वदुःखादिभिर्मुक्तो- १७
सर्वेषामभयं दत्वा १
सर्वोत्कर्षं स्मरन् विष्णो- १८
सहस्रेणापि सूर्य्याणां ६
सुभ्रुवं सुललाटान्तं ११
स्मरेथा इति चोक्त्वा १९
स्मृत्वा भागवतं शुद्ध- १

—०—

न्यासपद्धतिः

अ

अत्यन्ताशक्तविषये १०
अनेकभिक्षाचरणं ७
अरुणोदयवेलाया- २
अशक्तस्य यतेः शास्त्रे १०

क

कटिशौचं मृदा कुर्य्या- ३

त

तदन्नं भक्षयेत् स्वस्थो- ९
त्रिषञ्चसप्तसद्मानि ७
त्रिवारमुदकस्नानं १०

द

दण्डोदकं जपस्यान्ते ५
देवतां परमां सम्यक् ६
देवो नारायणो नित्यं ११
द्वादशसहस्रावृत्ति ५

ध

धृत्वोर्ध्वपुण्ड्रं विधिना ४

न

नरनारायणं नत्वा १
निवेदयेत् तदन्नं तु ९

न्यासधर्म्मस्य विषये १२

प

पूर्ण्णप्रज्ञेन मुनिना १२
प्रोक्ष्य देवाय महते ९

भ

भक्तानां मुक्तिदो नित्य- ११
भिक्षाकाले विधानेन ६
भिक्षाग्रहणकाले तु ८
भिक्षान्ने तज्जलं प्रोक्ष्य ८

म

मनो निवेश्याष्टमन्त्रान् ४

य

यतेराचरणं वक्ष्ये १

व

वेदान्तशास्त्राभ्यसनं ११

श

शौचादिकं यथान्यायं २

स

स्नानं कुर्य्याद् यथोक्तेन ३